॥अथहिरण्यकेशीआधानप्रयोगप्रारंभः॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ नत्वा योगेश्वरीं देवीं तथा हरिहरेश्व
र ॥ अनाध्यं परशुरामं च सत्याषाढं मुनिं गुरून् ॥ १ ॥ वृत्तिभाष्या वि
रुद्धां हि हिरण्यकेशिशाखिनां ॥ कुर्वेनुष्ठानसंसिद्ध्या अग्न्याधानस
पद्धतिं २ अग्न्याधानेकोधिकारीत्याकांक्षापूरणार्थमादावधिका
रिनिरूपणं क्रियते तत्र सूत्रं सामयाचारिकधर्मप्रश्ने अशूद्राणा
मदुष्टकर्मणामुपनयनं वेदाध्ययनमग्न्याधेयं फलवंति च कर्माणी
ति ब्रह्मक्षत्रियवैश्यानामित्यर्थः तृतीयप्रश्ने परिभाषासु च यथा द्र
व्यत्वाशरीरकार्त्स्न्यं चेति सूत्रं तथा च श्रुतिः अथ ह समर्थो विद्वान्मि १

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ति अथ। वित्तवान् समर्थः बलवान् कर्मकुशलश्च तथाह याज्ञ्य
वल्क्यः त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः प्राक्सौमिकीः क्रियाः
कुर्याद्यस्यान्नं वार्षिकं भवेत् अग्न्याधानप्रभृतिक्रिया इत्यर्थः श्रुत्यं
तरं च जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति जातपुत्र इति पुत्रोत्पादन सामर्थ्य ले
मात्रं द्योतयति तामाशिषमाशासेत तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो
जातः स्यात्तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायत इति श्रुतिलिंगात् पुत्रोत्पा
दनसामर्थ्यं तु पुंस एव न तु स्त्रियः ज। यावान्दश्मेहल्लेग्नीनादधीतेति
स्मृतिः आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्निति पुनर्दारकरणप्रक
मे याज्ञवल्क्यवचनाच्च॥ पुत्रोत्पादनसामर्थ्यं तु षोडशवर्षोर्ध्वं प्रा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

...वाहं च प्रयोगे प्रथमं स्थित। २

प्रोक्ते वर्षेन राः पलितयौवनाः। इति कृष्णावचनात्। एवमुक्ते सत्त्व
कारेष्वनधिकारमाह त्रिकांडमंडनः दर्शे चैव पौर्णमासे चैव सोमेज्या
स्विसंग्रहान्नु कुर्याज्जनके ज्येष्ठे सति दूरे वाप्यकुर्वति। तस्मात्प्रसव
माहस॥ क्षेत्रसंजीवनीजाने विद्यमाने पितामहे। नाधिकारविद्यावो त्रिमि
नोद्वैपितोरसी। पिंगवंधमूकबधिरपतितोन्मादद्दूषणे। सन्यस्ते छिन्न ह
स्ते तैयद्द्रोषंढादिदूषणे॥ जनके सोदरे ज्येष्ठे कुर्यादेवेतराः क्रियाः॥ तेषाम
नधिकारित्वात्त्वे तस्याधिक्रियाः स्मृति रिति॥ व्यभिचारवती याज्ञोद्वेषिणी द्रो
हिणी तथा॥ आधाने सा पुरिस्मा ज्यास्य न्न कारमगांतरादि विस्लयनधिकारः
दारा स्निहात्र संबंधं कुरुते योऽग्नेस्थितौ पस्त्रिवेत्रास विज्ञेयः परिवित्तिस्तु ॥४॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पूर्वजः॥परिवित्तिः१ परिवेत्ता च यया च परिविद्यते॥सर्वे ते नरकं यांति दा
तृयाजकपंचमाः॥इतियज्ञपार्श्वोक्तेः॥तत्रैव प्रतिप्रसवः॥क्लीबे देशांतरस्थे
च पतिते प्रव्रजे तथा॥योगशास्त्राभियुक्ते च न दोषः परिवेदने॥अन्धस्य
स्यधिकारो॥अग्रजश्च यदानग्निरधिकारोनुजे कथं॥अग्रजानुमतिः स्या
त्तात्रधिकारी ऽस्ति तु स इति॥निषादरथकारयोरप्यधिकार आचार्ये
णोक्तः॥निषादरथकारयोराधानादग्निहोत्रं दर्शपूर्णमासौ च निय
म्यते इति॥नकारादीतरेषां कर्मणां निवृत्तिः॥तत्र श्रुतिः॥लक्षणांता दे
वानां व्रतपते व्रतेनादधामीति रथकारस्येति॥निषादस्थपतिं याजये
दिति च॥अन्यत्सर्वं च तत्॥अपत्नीकस्याप्यधिकारोस्तीति श्रुतिलिंगा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

क्ष्यते। तत्रिंत्सं। भार्यया वशाया सहेति स्मृतिवचनात् भार्यावाशित्वं चाव
श्यकमेव। इत्यधिकारिनिरूपणं॥ अथ कालः॥ वसंतो ब्रालयस्या
धानकालः॥ ग्रीष्मो हेमंतश्च क्षत्रिय[illegible]स्य। वर्षा रथकारस्य। शरद्वै
श्यस्य। सर्वेषां वा शिशिरः सामान्यकालः॥ ॥अथ नक्षत्राणि। कृत्तिका
रोहिणी मृगशिर्षं पुनर्वसू फल्गुन्यौ हस्तश्चित्रा विशाखे अनूराधाश्रोणाः
प्रोष्ठपदाश्चोत्तरेग्न्याधेयनक्षत्राणीति। पूर्वाफल्गुनी उत्तराफल्गुनी॥ उत्तराभा
द्रपदाः॥ स्पष्टमन्यत्। तिष्योपि केषांचिन्मते। सूर्यनक्षत्रं नाम रेवतीति केचित्॥
एतानि त्रयोदश नक्षत्राणि नित्यानि काम्यानि च। नित्यत्वे ध्रुवरूढा माह। कृत्ति

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

का ब्राह्मणस्य। उत्तरे फल्गुन्यौ चित्रा च राजन्यस्य। अवशिष्टानीतरेषां सर्वेषां वैश्य
निषादरथकाराणां। काम्यानि तु सर्वेषां सर्वाणि। इति नक्षत्राणि। अमावास्यापौ
र्णमासी वा तिथिः। नक्षत्रानपेक्ष्यैव पर्वाधानमेवेदमिति केचित्। आपूर्यमाण
पक्षे वा पुण्ये नक्षत्रे। उभयमप्युक्तेष्वेव तु पुः यदेव ऋतुनक्षत्रपर्वयोगः सममृद्धः
कालः। तदभावे ऋतुनक्षत्रयोगस्त्ववश्यकः। तथा च बौधायनः। सा या वै शाख्याः
पौर्णमास्या उपरिष्टादमावास्या भवति रू।स ह्वः संवत्सरस्य रोहिण्या संपद्यते
तस्यामादधीतेति। अनेन ऋतुनक्षत्रयोगो गृहीतः। तत्र श्रुतिः। रोहिण्यामग्नि
मादधीत स्व एवैनं योनौ प्रतिष्ठितमाधत्ते ऋध्नोत्येनेनेति रोहिणी संस्तवाद्रो
हिण्याधानस्य प्राशस्त्यं सूचितं। कालांतरं चोक्तं। यद्देवैनं श्रद्धोपनमेत्तदाद

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ·प्र·
४

धीत। इद्वंतूक्तनक्षत्रेष्वेवेति प्रयोगवैजयंतीकारः। अत्यंतातुरविषयमिति बोधा
यनः। सोमेन यक्ष्यमाण आदधानो नर्तुंसूर्क्षेन्न नक्षत्रं॥ सुत्याकालानुरोधेन पू
र्वमाधानं कर्तव्यमित्यर्थः। इत्याधानकालः। अथाग्न्याधानदिवसं ज्योतिर्विदा
दिभ्योक्तलक्षणं निर्णीय तस्मात्पूर्वमेवात्मशुध्यर्थं ज्ञाताज्ञातपापानुसारेण
श्रुत्युक्तं स्मृत्युक्तं वा प्रायश्चित्तं कुर्यात्। तथाह बोधायनः। अग्निमाधास्यमा
नः प्राज्यमात्मानं कुर्वीत येनास्य कुशलं स्यात्तेन कुशलं कुर्वीतेति यथोक्तमात्म
नः पुरश्चरणमिति। प्राज्यं शुद्धं। येन कर्मणास्य प्रायश्चित्तं स्यात्तेन तथा कुर्वीत।
वैखानसस्तु। युक्तः श्रद्धान्वितो यजमानोनुज्ञातः केशश्मश्रुलोमनखानि च
वापयित्वा विधिवत्स्नातः। इषे त्वोर्जे त्वेत्यादि स्वाध्यायमधीते शतं प्राणायामं कु ४

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

र्यात्। ध्यापयन्नारायणमुपोष्य सपत्नीको घृतमिश्रं हविष्यं क्षीरेणाश्नीयात्
स्मृत्युक्तं व्रतमाचरन्पावनार्थमसकृत् होमान्कूष्मांडादींश्च जुहुयादिति। सु
क्तः इंद्रियचापल्यरहितः ब्राह्मणानामनुज्ञामादाय। उपोष्य अन्नत्यागेन निय
तात्मा। स्पष्टमन्यत्। तथा च स्मृत्युक्तमपि कृच्छ्रचांद्रायणप्राजापत्यादिकं प्रा
यश्चित्तं यावदात्मशुद्धिं कर्माधिकारित्वं च मन्यते तावद्यथाशक्ति प्रत्याम्नाये
न कुर्यात्। तथा च ज्ञाताज्ञातसर्वोपपा॰ निबर्हणार्थं सर्वप्रायश्चित्तं षडब्दं
त्र्यब्दं सार्धाब्दं वा कुर्यात्। तद्यथा। अथ सर्वप्रायश्चित्तप्रयोगः॥ शुभदिवसे प
र्षदं परिकल्प्य कृतस्नानः क्लिन्नवासा अनशनस्त्रिवारं पर्षदं प्रदक्षिणीकृत्य
समस्तसंपदिति श्लोकचतुष्टयं पठन्। साष्टांगं प्रणमेत्। पर्षल्लक्षणमाह याज्ञ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ·प्र· वल्क्यः॥ चत्वारोवेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा॥ साब्रूते यं स धर्मः स्यादेको वाध्यात्म
५ विन्नमा इति। ततः सभ्यैः किं ते कार्यमिति पृष्टे उत्थाय गोवृषक्रयद्रव्यं पर्षदग्रे निधा
यकरद्वयं संपुटीकृत्य तिष्ठन्वदेत्। मम। मुक.. त्रस्यामुकशर्मणः सपत्निक
स्य जन्मप्रभृति अद्ययावत् ज्ञानाज्ञान.. भ्याकामसकृदसकृत्कायिकवा
चिक.. नसिकसांसर्गिकस्पृष्टास्पृष्ट भुक्ताभुक्तपीतापीतसकलपातकाति
पातकोपपातकलघुपातकसंकलीकरणमलिनीकरणापात्रीकरणजाति
भ्रंशकरप्रकीर्णकपातकानां मध्ये संभावितपातकपातकानां निरासार्थं तथा
चसत्य। स्नानाधिकारे तद्दिनमारभ्यामुकदिनपर्यंतमनाहिताग्निताजनित ५
दोषनिबर्हणार्थं चानुग्रहं कृ.. प्रायश्चित्तमुपदिशंतु भवंत इति॥ ततस्ता

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

न्प्रार्थयेत्। सर्वेधर्मविवेक्तारो गोप्तारः सकला द्विजाः॥ मम देहस्य संशुद्धिं कुर्वंतु
द्विजसत्तमाः॥ मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं॥ प्रसादः क्रियतां मह्यं
शुभानुज्ञां प्रयछथ॥ पूज्यैः कृतः पवित्रोहं भवेयं द्विजसत्तमैरिति।
मामनुगृह्णंतु भवंतः॥ इत्युक्त्वा पुनः साष्टांगं प्रणमेत्॥ ततस्तेस्त
थेत्युक्ते उत्थाय निबंधपूजनं सभ्यपूजनं च कृत्वा निबंधपूजनांगत्वे
न किंचिद्द्रव्यं निबंधाग्रे स्थापयित्वा अनुवादकपूजनं कृत्वा तस्मै
दक्षिणां च दत्वा कृतांजलिपुटस्तिष्ठेत्॥ ततः सभ्याः तस्य पा
पानुरोधेन यथाशास्त्रं प्रायश्चित्तं सर्वसभ्यसंमतं अमुकप्रा[illegible]
जापत्यात्मकं निश्चित्यानुवादकं श्रावयेयुः॥ ततोनुवादकः प्राय

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

श्चित्तिने सभ्योपदिष्टं प्रायश्चित्तमुपदिशति।। अमुकगोत्रोत्पन्नस्यामु
कशर्मणः सपत्निकस्य तव जन्मप्रभृत्यद्य यावत् ज्ञानाज्ञान० कार्ना
मध्ये संभावितपातकानां निरासार्थं तथाग्न्याधानाधिकारदिवस
प्रभृति निश्चिताधानपर्यंतमनाहिताग्नितजनितदोषनिबर्हणा
र्थं अमुक प्राजापत्यात्मकं प्रायश्चित्तं सभ्यैरुपदिष्टं तेन प्राच्योदी
च्यांग सहितेनाचीर्णेन तव शुद्धिर्भविष्यति। तेन त्वं कृतार्थो भवि
ष्यसि। इत्युपदिशेदनुवादकः। ततो निवेदित प्रायश्चित्तं। ॐ मि
त्यंगीकुर्यात्।। एवं त्रिरुपदिशः त्रिरंगीकुर्यात्।। ततः पर्षदं प्रणि
पत्य विसर्जयेत्। तस्मिन् दिने उपवासः। इति प्रायश्चित्तोपदेशः।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ततःकस्यांचिद्रिक्तायांतिथौकृतमाध्याह्निकःदंतधावनकाष्ठंमृद्भ
स्मपंचगव्यदूर्वांकुशान्गांआज्यंसमिधःकांसीपलाशपर्णानिपाला
शादिपात्रं विष्णुश्राद्धोपस्करद्रव्याणिएतान्प्रायश्चित्तांगसंभारान्संभृत्य
सायाह्नेग्रामाद्बहिर्गंगादितीर्थसमीपेगत्वाशुचिर्भूत्वा दर्भेष्वासीनोद
र्भान्धारयमाणःपत्न्यासहप्राणानायम्यदेशकालौसंकीर्त्यममामुकगो
त्रस्यअमुकशर्मणःसपत्नीकस्यजन्मप्रभृतिअद्ययावत्ज्ञाताज्ञान॰पा
तकानांमध्येसंभावितपातकानांनिरासार्थंतथाग्न्याधानाधिकारदिवस
प्रभृतिनिश्चिताधानपर्यंतंअनाहिताग्नितजनितदोषनिबर्हणार्थंसभ्यो
पदिष्टंअमुकप्राजापत्यात्मकप्रायश्चित्तंअमुकप्रत्याम्नायेनाहमाचरि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

७ व्यांगसहितमाचरिष्ये। इतिसंक[illegible]तत्रप्रत्याम्नायकल्पनंशक्त्यनुसा
रेण। सत्यांशक्तौहीनप्रत्याम्नायकल्पनंनकर्तव्यं। अनाहिताग्निताद्दोष
प्रायश्चित्तंतुप्रतिवर्षंचांद्रायणंकुर्यात्॥ चांद्रायणप्रत्याम्नायस्तुप्राजाप
त्यत्रयं। तत्रप्राजापत्यप्रत्याम्नायस्तु। अयुतंगायत्रीजपः। द्वादशब्राह्मण
भोजनं[illegible]। गोदानं। तदशक्तौगोनिष्क्रयद्रव्यदानं। गायत्र्यावाव्याहृतिभिः
प्रणवेनवासहस्रंतिलहोमः। तीर्थयात्रोद्देशेनपञ्चांयोजनमात्रगमनं॥
शुष्ककेशस्यद्वादशस्नानानि केषांचिन्मतेरुद्रैकादशिनी। त्रिंशत्प्राजाप
त्यात्मकमेकंअब्दं॥ ततः। यानिकानिचपापानिब्रह्महत्यासमानिच। केशा ७
नाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं। इतिश्मश्रूपपक्षकेशानखानिवाप

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यित्वा पत्नीर्थ्याचाराविरुद्धं। ततः शुध्यर्थं। स्नात्वा द्वादशांगुलकाष्ठेन दंतान्शो
धयेत्। आयुर्बलं यशोवर्चः प्रजाः पशुवसूनि च। ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि
वनस्पते। इति दंतान्संशोध्य द्वादशगंडूषान्कृत्वा शुध्यर्थं स्नानं कुर्यात्।
ततः शरीरशुध्यर्थं दशविधस्नानानि कुर्यात्। तत्रादौ भस्मस्नानं। ईशा
नायेति शिरसि। तत्पुरुषायेति मुखे। अघोरायेति हृदये। वामदेवायेति गु०
सद्योजातायेति पादयोः। ॐमिति सर्वांगे। ततो जलस्नानमब्लिंगाभिः।
अथ गोमयस्नानं। अग्रमग्रं चरंतीनामोषधीनां वने वने। तासामृषभप
त्नीनां पवित्रं कायशोधनं। यन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा। इति शि
रः प्रभृति सर्वांगे विलिप्य॥ ततो जलस्नानं। अथ मृत्तिकास्नानं तत्र सूत्रं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ॰ग्र॰ नैधायनीयं। अथातो मृत्तिकास्नानविधिं व्याख्यास्यामो ब्रह्मचारी गृहस्थ
वानप्रस्थपरिव्राजकानामश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा इति भूमिं दूर्वे अभिमं
त्र्योद्धृतासीति नदीतीरे लोष्टमादाय कांडात्कांडादिति द्वाभ्यां दूर्वामादा
य मृत्तिके हन मे पापमिति दूर्वां लोष्टे प्रतिष्ठाप्य यत इंद्र भयामहे स्वस्ति
दा स्वस्ति न इंद्रो वृद्धश्रवा स्वातारमिंद्रं परं मृत्यो अनुपरेहि स्योना पृथि
वीति षड्भिः प्रतिमंत्रं प्रतिदिशं लोष्टमुत्सृज्य गंधद्वारामिति लोष्टमादा
योदुत्यं जातवेदसमिति लोष्टमादित्यं दर्शयित्वा श्रीर्मे भजत्व लक्ष्मीर्मे
नश्यत्विति शिरः प्रदक्षिणीकृत्य सहस्रशीर्षेति शिर आ... विष्णुमुखा ८
इति मुखं मो ... ... इति ... सोमानं
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

स्वरणमितिकु...शरीरंयज्ञशमलमितिशरीरंनाभिर्मेचित्तंविज्ञानमितिनाभिं
मापांतमन्युरितिकटीविल्लोरराटमितिपृष्ठंवरुणस्यस्कंभनमसीतिमेढ्रंमानंदं
नंदावित्यांडावूरूओरोजइत्यूरूजंघाभ्यामितिजंघेचरणंपवित्रमितिचरणावि
दं विष्णुस्त्रीणिपदेतिद्वाभ्यामधस्तलपादौसजोषाइतिदूर्वासहितंशोषंशिरसि
आधायहिरण्यशृंगमितितीर्थसमीपंगत्वासुमित्रानआपओषधयःसंत्वित्यात्मा
नमभिषिंचेदुदकांजलिमादायतांदिशंक्षिपतिदुर्मित्रास्तस्मैभूयासुरितिप्रथ
मंयोस्मान्द्वेष्टीतिद्वितीयंयंचवयंद्विष्मइतितृतीयंतीर्थमवगाह्यापोहिष्ठामयोभुव
इतितिसृभिर्हिरण्यवर्णाइतिचतसृभिःपवमानःसुवर्जनइत्येतेनानुवाकेनचमा
र्जयत्वेमंमेगंगइतिजलमालोड्यदेवान्ऋषीन्पितृंश्चतर्पयित्वा॰हतंवासःपरि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०
१

यायशुचिः पूतो भवति भवति॥ ततः पंचगव्यस्नानानि। गायत्र्या गोमूत्रस्नानं॥ गंधद्वारामिति गोमयस्नानं। आप्यायस्वेति दुग्धस्नानं। दधिक्राव्ण इति दधिस्नानं। घृतं मिमिक्ष इति घृतस्नानं। देवस्य त्वेति कुशोदकस्नानं। इति स्नानमध्ये शुद्धोदकस्नानं। स्त्रीणां तु सर्वाणि स्नानानि तूष्णीं॥ ततो नित्यस्नानविधिना स्नातो। स्नानांगतर्पणं कुर्यात्। पत्नी स्नानमात्रं। उत्तीर्याहते वाससी परिधायान्यस्य गोमयोपलिप्ते शुद्धस्थले उपविश्य विष्णुश्राद्धं कुर्यात्। तत्र विष्णुपूजनं षोडशोपचारैः कृत्वा पापापहा महाविष्णुप्रीत्यर्थं चतुरो ब्राह्मणान्भोजयेत्। तेभ्यो दक्षिणां च दद्यात्। अथवा चत्वार्यामान्नानि तन्निष्क्रयद्रव्यं वा दद्यात्। इदं विष्णुश्राद्धं। अनेन विष्णुश्राद्धेन पापापहा महाविष्णुः प्रीयतामित्युक्त्वा सांगुण्याय विष्णुं स्मरेत्। ततो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

गोदानं ब्राह्मणं गांचोक्तविधिना संपूज्य गोपुच्छं ब्राह्मणहस्ते दत्वा गवामंगेषु तिष्ठं
ति भुवनानि चतुर्दश यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र चेति मंत्रमुच्चार्यमुकगो
त्रोत्पन्नायामुकशर्मणे ब्राह्मणाय इमां गां पापहां महाविष्णुप्रीत्यर्थं प्रायश्चित्तपूर्वांग
त्वेन तुभ्यमहं संप्रददे न ममेति वदेत् देवस्य त्वा० रुद्राय गामिति प्रतिग्रहः कृतस्य
गोदानस्य सांगता सिध्यर्थं किंचिद्द्रव्यं दक्षिणात्वेन दद्यात् अथवा गोनिष्क्रयद्रव्यं
वानेनैव मंत्रेण दद्यात् ततः स्वशाखोक्तविधिनाऽग्निं प्रतिष्ठाप्य परिस्तीर्य परिषि
च्याज्यं संस्कृत्य दर्वं संमृज्य पापापहा महाविष्णूद्देशेन व्याहृतिभिरष्टाविंशत्याहुतीर्जु
हुयात्। ततो ब्रह्मकूर्चविधिना पंचगव्यं कुर्वीत। तत्र बौधायनसूत्रं। ब्रह्मकूर्चं प्रवक्ष्या
मि कायशोधनमुत्तमं। शूद्राणां भोजने भुक्त्वा वेदानां विक्रये तथा। होमातिक्रम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

श्रा०प्र० कालेतुपर्वहीनमसंस्कृतं॥एतेषांचैवशुध्यर्थं पंचगव्यंप्रशस्यते॥कपिला
१० ताम्रवर्णाःश्वेतानीलातथा कृष्णा॥कपिलायाघृतंग्राह्यंताम्रवर्णाःप
यस्मृतं॥श्वेतायास्तुदधिग्राह्यं नीलायागोमूत्रंकृष्णायागोमयमुच्य
ते॥गोमूत्रंतुफलंदद्यादंगुष्ठार्द्धंतु गोमयं॥क्षीरंसप्तफलंदद्याद्दध्नस्त्रि
फलमुच्यते॥पलमेकंघृतंग्राह्यंपलमेकंकुशोदकं॥गायत्र्यागृह्यगो
मूत्रंगंधद्वारेतिगोमयं॥आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि॥शुक्रम
सिज्योतिरसितेजोसीत्याज्यंदेवस्यत्वेतिकुशोदकंमापोहिष्ठेतिमंथयेत्प
नदीप्रस्रवणेतीर्थेरहस्येनिर्जनेदेशे॥यज्ञागारेगवांगोष्ठेदेवतायतनेषुच।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

स्य

तत्र स्नात्वा शुचिर्भूत्वा मुक्त्वा सा जितेंद्रियः। पालाशं पद्मपत्रं वा ताम्रभाजनमेव वा
का। औदुंबरमयं पात्रं श्रीवृक्षं तथैव च॥ सप्त पत्राः स्तुभा दर्भा अक्षताश्चैव सं
युताः॥ तेनैवोष्टस्य होतव्यमग्नये स्वाहा सोमाय स्वाहा॥ इरावतीदं विष्णुर्वि
ष्णोर्नुकं मानस्तोके च गायत्री ब्रह्म जज्ञानमिति तस्य चतुर्थभागं कृत्वा प्रणवेना
लोड्य प्रणवेनाभिमंत्र्य प्रणवेन पिबेत्प्रणवेन तु॥ ब्रह्मणा निर्मितो ह्येषः सत्य
शौचात्मको द्विजऋषिभिर्वारुणिस्तु ल्यानां शौचार्थं स … मुदाहृतः॥ मासि
मासि प्रयुंजानो विरजो भवत्यर्धमासेर्धमासे प्रयुंजानो ऋषिलोकमवाप्नो
ति॥ षण्मासे षण्मासे स्वर्गलोकमवाप्नोति॥ संवत्सरमहरहः परं ब्रह्माधिगच्छति॥
त्वक्स्थिगतैः पापैर्मलिनैर्देहतिष्ठंति मानवाः॥ ब्रह्मकूर्चो दहेत्तस्य यथाग्नि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ॰प्र॰
११

रिवेंधनमिति प्रयोगः आघारवत्तंत्रं आपूर्विकंका देशाकालौ संकीर्त्य मम स
पत्नीकस्य शरीरगत सकल कल्मषनाशनार्थं ब्रह्मकूर्चविधिना पंचगव्याशनं
करिष्ये उद्धननाद्यग्निप्रतिष्ठापनांतं कृत्वान्वाधानं कुर्यात् अद्रुएहीत्यादिमि
विष्टमित्यंते पंचगव्यहोमकर्मणि यक्ष्यमाणा देवता॰ वैशेषिकप्रधानहोमे
अग्निं पंचगव्येन यक्ष्ये सोमं पंचगव्येन॰ विष्णुं॰ रुद्रं पं॰ सवितारं पं॰ ब्रह्म
णं पं॰ परमात्मानं पंचगव्येन यक्ष्ये उत्तरांगदेवता इत्यादि पात्रासादनकाले
दर्व्यासहस्तपत्रान्सप्राग्रान् अक्षतान्दर्भान् आज्यास्थाल्यास्तह पालाशाद्य
न्यतमं पात्रं अंते पंचगव्यानि पृथक् पृथक् सादयेत् पात्रप्रोक्षणांते पालाशाद्य २
पवित्रे दिपात्रैंनिधाय गायत्र्यादिमंत्रैस्तस्मिन्पंचगव्यानि आनीय देवस्येति षष्ठंकु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

शोदकं ततस्वापोहिष्ठेतिशलाकादिनामंथयेत् दर्भैर्निष्टपनादि० आज्येन
सहपंचगव्यस्यपर्यग्निकरणं।प्रधानहोमेसप्तपत्रैर्दर्भैर्गृहीत्स्यतेरेवजुहुयात्।अग्न
येस्वाहा।अग्नयइदं० सोमायस्वाहा।सोमायेदं०इरावतीधेनुमतीहिभूतंसूय
वसिनीमनवेयशस्य।व्यस्ककाद्रोदसीविष्णुरेतेदाधारपृथिवीमभितोमयूखैः
स्वाहा।विष्णवइदं०इदंविष्णु०मुरेस्वाहा।विष्णवइदं।विष्णोर्नुकंवीर्याणिप्रवोचं।घोरुगायस्वा
हा।विष्णवइदं० मानस्तोकेमविधेमतेस्वाहा।रुद्रायेदं०तत्सवितुर्वरेण्यं०दयात्स्वाहा।
सवित्रइदं०ब्रह्मजज्ञानंप्र०विवस्वाहा।ब्रह्मणइदं०ॐस्वाहा।परमात्मनइदं०
एतैर्मंत्रैःप्रणवाद्यस्याचतुर्थभागःजुहुयात्।।ततोवारुण्यादिकर्मशेषंसमा
प्यपंचगव्यंहुतशेषंप्रणवेनालोड्यप्रणवेनाभिमंत्र्यपात्रहृदयेकृत्वाब्राह्मणेर

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

नुज्ञातौ दंपती। विधेतां प्रणवेन। तस्मिं दिवसे पंचगव्याशिना वेव तिष्ठेतां। अथास्मै
हविष्याशनं वा। इदं सर्वं नक्षत्रदर्शने कर्त्तव्यं। इति पंचगव्यं। अनेन विधिना पूर्वांगं कृत्वा संक
ल्पानुसारेणोक्तप्रत्याम्नायेन प्रायश्चित्तमाचरेत्। प्रायश्चित्तांते उत्तरांगानि कुर्यात्। व
व्याहृतिभिराज्यहोमः विष्णुश्राद्धं गोदानं च पूर्वोक्तविधिना कुर्यात्। इति स्मृत्युक्तं
सर्वप्रायश्चित्तं॥ ॥अथवा लक्षहोमकोटिहोमादिकं स्वातंत्र्येणैवात्मशुध्यर्थं
कुर्यात्॥ न तत्र गोदानप्रत्याम्नायादिकल्पनप्रकारः॥ न गोप्रदानादि च्यंग। अथ स्मृत्युक्तं
प्रायश्चित्तं कूश्मांडहोमादि। तत्सूत्रं बौधायनीयधर्मप्रश्ने। कूश्मांडैर्जुहुयाद्यो
पूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति यो योनौ रेतः सिंचति यदर्वा १२
चीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यत इत्ययोनौ वा रेतः सिक्त्वान्यत्र स्वप्नादि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

वा
तोवापवित्रकामोऽमावास्यायांपौर्णमास्यांवाकेशश्मश्रुलोमनखानिवापयित्वा
ब्रह्मचारिकल्पेनव्रतमुपैतिसंवत्सरंमासंचतुर्विंशत्यहंद्वादशरात्रीः॥षट्तिस्रो
वानमांसमश्नीयान्नस्त्रियमुपेयान्नोपर्यासीतजुगुप्सेतानृतात्पयोभक्षयी
तिप्रथमःकल्पोयावकंवोपयुंजानःकृच्छ्रंद्वादशरात्रंवाव्रतंचरेद्भिक्षेद्वानद्विघेषु
यावाग्रराजन्योवैश्यश्चाभिक्षाःसपूर्वाह्णेपाकयज्ञिकधर्मेणाऽग्निमुपसमा
य धायसंपरिस्तीर्याग्निमुखात्कृत्वाथाज्याहुतीरुपजुहोतियद्देवादेवहेडनंयद्दी
व्यन्नृणमहंबभूवआयुष्टेविश्वतोदधदित्येताभिरनुवाकैःप्रत्यृचमाज्यस्य
जुहुयात्सिंहेव्याघ्रउतयापृदाकाविति चतस्रःस्रुवाहुतीरग्नेऽभ्यावर्तिन्न
न्नग्नेऽङ्गिरःपुनरूर्जासहरय्येतिचतस्रोऽभ्यावर्तिनीर्हुत्वासमिधमादधातियजमा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०
२३

नलोके वसुभ्यायवैश्वानरायप्रतिवेदयामइतिद्वादशकर्चेनसूक्तेनोपतिष्ठेतयन्म
यामनसावाचाकृतमेनः कदाचन सर्वस्मात्तस्मान्मेळितामोग्धित्वं हिवेथ
यथातथं स्वाहेतिसमिधामाधायवरंददातिजयप्रभृतिसिद्धमाधेनुवरः प्र
दानादेवैकाग्नेपरिचर्याथाग्न्याधेयं यद्देवादेवहेळनं यद्दीव्यंनृणमहंन
भूवायुष्टेविश्वतोदधदितिपूर्णाहुतिं हुत्वाऽग्निहोत्रमारप्स्यमानोदशहो
त्राहुत्वादर्शपूर्णमासावारप्स्यमानश्चतुर्होत्राहुत्वाचातुर्मास्यान्यारप्स्यमा
नः पंचहोत्राहुत्वापशुबंधेषड्ढोत्रासोमेसप्तहोत्राविज्ञायतेचक र्णीदिग्वेतै
र्जुहुयात्सूताद्देवलोकान्समश्नुतइतिहिब्राह्मणमितिश्रिब्राह्मणं तस्यप्र
योगः कस्यांचिदमावास्यायांपौर्णमास्यांवाहुतप्रातःक्रियः औपासना

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ग्नेः पश्चाद्दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ सं
कीर्त्य मम सपत्नीकस्य नोनिबर्हणार्थं संवत्सरं मासं चतुर्विंशतिरात्रं द्वादशरा
त्रं षड्रात्रं त्रिरात्रं वा कूश्मांडैर्होष्यामि। इति संकल्प्य गणेशं संपूज्य पुण्याहं वा
चयेत्। तत्र देवत्स्का ता आदित्यादयः प्रीयंतामिति विशेषः। ततः [illegible]श्मश्रूपपक्ष
वा केशनखानि केशश्मश्रूपपक्षलोमनखानि वा वापयित्वा पत्न्याचाराविरुद्धं स्ना
त्वाहते वाससी परिदधीत। ततः औपासनाग्नेः पश्चादुपविश्याग्निमुपसमाधा
य देवतापरिग्रहार्थमन्वाधानं कुर्यात्। अस्मिन्नहीत्यादि प्राणायामांते कूश्मांड
होमकर्मणि या यक्ष्यमाणा देवतास्ताः सर्वाः परिग्रहीष्यामि व्याहृतिपर्यंतमुक्त्वा
वैशेषिकप्रधानहोमे देवानादित्यानाज्येन यक्ष्ये। विश्वान्देवानाज्येन॰ द्यावापृ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ°
४

धियो सरस्वतीं वा° इंद्राग्नी मित्रावरुणौ सोमं धातारं बृहस्पतिं व° जातवेदसं° अ
ग्निं गार्हपत्यं° ज्योतिः° अग्निं° अग्निं गार्हपत्यं° अग्निं° अग्निं गार्हपत्यं° २ अ
ग्निं° अग्निं गार्हपत्यं° अपः सुधनीः° अपो हिरण्यवर्णाः° वरुणं° २ अग्नीवरु
णौ° २ अग्निमयं° अग्नी द्रोणं° ग्रंपश्याः राष्ट्रभृतम स्परसो च° ग्रंपश्याः
राष्ट्रभृतं व° वरुणं वतुः ४ अग्नीवरुणौ° २ संकुसुकं विकुसुकं निर्ऋथं निःस्वनं
व° कुस्यां निर्ऋतिं व° दुःशासः सानुशासः सौघनमनुघणं च° त्वष्टारं° आयुष्म
ग्निं° आयुर्दामग्निं° अग्निं वरूम रितिं विश्वां देवाः ५ अग्निं पवमानं° ३ अग्नि
जातवेदसं आतवेदसं° अग्निं वृत्रहणं° अग्निं उषसां निम्रुचं व° देवानां° जातवे २५
दसमग्निं° अग्निं° अन्नं° ब्रह्माणं° वैश्वानरं° त्वि वौ ४ अपि मम्यावर्तिनं° ४
ढूः

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

अंगहोमे वरुणमित्यादि॰ व्याहृतिपर्यंतं हुत्वा स्रुवाहुतीर्जुहोति ॥ यद्देवा देवहेळ
नं॰ सितस्वाहा। देवेभ्यश्चादित्येभ्यश्चेदं न मम ॥ देवाजीवनकाम्या॰ जोषसः स्वाहा ॥
विश्वेभ्यो देवेभ्य इदं॰ ऋतेन द्यावापृथिवी॰ दिमस्वाहा॥ द्यावापृथिवीभ्यां संसरस्वत्यै
चेदं॰ इंद्राग्नी मित्रावरुणौ॰ रिमस्वाहा ॥ इंद्राग्निभ्यां मित्रावरुणाभ्यां सोमाय धा
त्रे बृहस्पतये चेदं॰ सजातशंसा उत जामि॰ मुमुग्धि स्वाहा ॥ जातवेदस इदं॰ यद्वा
चा॰ कृता स्वाहा॥ अग्नये गार्हपत्यायेदं॰ येन त्रितो॰ आक्षि स्वाहा॥ ज्योतिष इदं॰
यत्कुसीदम॰ दधामि स्वाहा॥ अग्नय इदं॰ यन्मयि माता॰ नसः स्वाहा॥ अग्नये
गार्हपत्यायेदं॰ अतिक्रामा॰ कः स्वाहा॥ अग्नय इदं॰ त्रिते देवा॰ नसः स्वाहा॥ अग्न
ये यदापिपेष॰ भवामि स्वाहा॥ अग्नय इदं॰ यदंतरिक्षं॰ नसः स्वाहा॥ अग्नये गार्हप॰

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ· ये गार्हपत्याये०दिविज्ञाता ०शुंधनीः स्वाहा॥अद्भ्यः शुंधनीभ्य इदं०यदापो नक्तं०त
१५ नः स्वाहा॥अद्भ्यो हिरण्यवर्णाभ्य इदं०इमं मे वरु०च के स्वाहा॥वरुणायेदं।०तत्वा
यामि०मोषीः स्वाहा॥वरुणायेदं०त्वन्नो अग्ने०ध्यस्मत्स्वाहा॥अग्नीवरुणाभ्यां०
सत्वन्नो अग्ने०एधिस्मा स्वाहा॥अग्नीवरुणाभ्यामिदं०त्वमग्ने अयास्य०षजं स्वा
हा॥अग्नये ऽयस इदं०यद्दीव्यं०चताः स्वाहा॥अग्नी[illegible]भ्यामिदं०यद्धस्ताभ्यां०
ष्णानि स्वाहा॥उग्रं पश्यायै राष्ट्रभृते सरोभ्यां चेदं०उग्रं पश्ये राष्ट्रभृ०ज्जुराय स्वाहा॥
उग्रं पश्यायै राष्ट्रभृते चेदं०अवते हेडो०रुतानि स्वाहा॥वरुणायेदं०उदुत्तमं०
स्याम स्वाहा॥वरुणायेदं०इमं मे वरुण०के स्वाहा॥वरुणायेदं०तत्वा यामि०मो १५
षीः स्वाहा॥वरुणायेदं०त्वन्नो अग्ने०ध्यस्मत्स्वाहा॥अग्नीवरुणाभ्यामिदं०

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

सत्वन्नो अग्ने॰ रुधि स्वाहा। अग्नीवरुणाभ्यामिदं॰ संकुसुको विश्वतं॰ स्वाहा। संकु
सुक विकुसुकाय निर्ऋथाय निसृनायचेदं॰ निर्यक्ष्म मचीचते॰ सुवामसि स्वा
नि हा। कृत्यायै निर्ऋत्यै चेदं॰ दुःशंसानुशंसाभ्यां॰ मसि स्वाहा। दुःशंसानुशं
साभ्यां घणायानुघणाय चेदं॰ सं वर्चसा प॰ द्विलिषः॰ स्वाहा। त्वष्ट्र इदं॰ आयु
ष्टे विश्वतो॰ मिते स्वाहा। आयुर्वे अग्नय इदं॰ आयुर्दा अग्ने ह॰ दिमं॰ स्वाहा।
आयुर्देऽग्नय इदं। इममग्न आयुषे॰ थास स्वाहा। अग्नये वरुणाय आदित्येभ्यो वि
श्वेभ्यो देवेभ्यश्चेदं॰ अग्न आयूंषि॰ दुच्छुनां॰ स्वाहा। अग्नये पवमानायेदं॰
अग्ने पवस्व स्वपा॰ पोषं॰ स्वाहा। अग्नये पवमानायेदं॰ अग्निर्ऋषिः॰ गयं॰

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

६ स्वाहा।अग्नयेपवमानायेदं०अग्नेजाताञ्प्रणुदा०उङ्नोस्वाहा।अग्नयेजातवेद
सेचेदं०सहसाजातान्०सपत्नान्स्वाहा।जातवेदसइदं०अग्नेयोनोभितो०मोर भ
स्वाहा।अग्नयेवृत्रघ्नइदं०अग्नेयोनोभिदासति०दध्मसिस्वाहा।अग्नयइदं०
योनःशपादशपतो०मूहताःस्वाहा।उपसेनिम्रुचेचेदं०योनःसपत्नोयो०
चनःस्वाहा।देवेभ्यइदं०योमांद्वेष्टिजातवेदो०यंचमांःस्वाहा।जातवेदसेग्न
यइदं०योअभ्यमराती०षाकुरुस्वाहा।अग्नयइदं०संशितंमेब्रह्मसंशितं०
पुरोहितःस्वाहा।ब्रह्मणइदं०उदेषांबाहू०स्वांअहंःस्वाहा।ब्रह्मणइदं०पुनर्म
नःपुन०विश्वास्वाहा।वैश्वानरायेदं०सिंहेव्याघ्रउत०विद्वान।स्वाहा।त्विष्यै
देव्याइदं०याराजन्ये०दानास्वाहा।त्विष्यैदेव्या०याहस्तिनि०दानास्वाहा।त्वि १८
ष्यैदेव्याइदं०रथेअक्षेषु०दानास्वाहा।त्विष्यैदेव्याइदं०अग्नेभ्यावर्तिन्

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

धनेनस्वाहा।अग्नयेभ्यावर्तिन इदं०अग्ने अंगिरः०रयिमाहृधि स्वाहा।अग्न
येभ्यावर्तिनइदं०पुनरूर्जा निवर्तस्व०शतः स्वाहा।अग्नयेभ्यावर्तिनइदं०सह र
य्यानि०स्पाएस्वाहा।अग्नयेभ्यावर्तिन इदं०ततो यजमानः समित्पाणिः स्वाय
तने तिष्ठन् वैश्वानरायप्रतिवेदयाम इति द्वादशर्चेनोपतिष्ठेत।तत्रैवोपविश्यतं
समिधमादधाति।यन्मयामनसावाचा०यथातथं स्वाहा।अग्नये वैश्वानराय
इदं०तत आचार्याय वरं ददाति।गौर्वै ब्राह्मणस्य ग्रामो राजन्यस्याजा वैश्यस्येति
पारस्करः।सुवर्णं गुंजामात्रमित्येके।ततइमंमेवरुणेत्यादि कर्मशेषं समापये
त्।एवं संवत्सराद्यन्यतमदीक्षांतं अग्न्यन्वाधानादि उत्तरपरिषेकांतं प्रत्यहं कु
र्यात्।दीक्षांतं व्रतं च कुर्यात्।प्रथमेह्नि अन्वाधानात्पूर्वं होमांते वा व्रतसंक
ल्पः।ब्रह्मचारिकल्पेन।संवत्सराद्यन्यतरकालपर्यंतं दीक्षां करिष्यामि।मां

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ० साशनंनकरिष्यामि। ययस्थाने स्त्रियंनोपेष्यामि।उपरिनासीदामि।अनृ
१७ अनृतंनवदिष्यामि स्नुहं पयोव्रतंकरिष्यामि।पयस्थानेयवागूराजन्यः।आमि
क्षावैश्यः।क्षारंलवणंशमीधान्यंचवर्जयेत्।नोपरिशायी ताभूशायोच्छिष्टंन
द्यात्।दिवानस्वपेत्।इदंसर्वंमनसासंकल्प्यकुर्यात्।पयोव्रतकरणासामर्थ्ये
यवोदनंब्राह्मणोनुव्रतयेत्।धानाराजन्यः।आमिक्षावैश्यः।इतिकूष्मांडहो
मः।जमदग्निप्रोक्तस्त्वेवमेवस्मृतिः हेम्याघ्रइसाधाकृतिचतुष्टयाभ्यावर्तिनी
तुष्टपराहितःकार्यः॥इतिकूश्मांडहोमः॥ ॥अथगणहोमः।तत्सूत्रंबोधायनं
धर्मसूत्रे।तापवित्रैःसहस्मास्मोमगाराः लोमुचोगणो।पावमान्यश्चकूश्मां १७
डीवैश्वानर्यऋचश्चयाः।घृतौदनेनजुहुयात्सप्ताहंसवनत्रयं।मौनव्रतस्नातोह

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

विष्याशी निगृहीतो जितेंद्रियः॥ सिंहे मात्या अशंपूर्णे पात्रे वेक्ष्य चतुष्पथे॥ मु
च्यते सर्वपापेभ्यः सामर्ग्यजुरथर्वणां॥ कर्मभिर्यैरवाप्नोति क्षिप्रं कामान्म[illegible]गुते
निति॥ अथ प्रयोगः॥ शुक्लपक्षे पुण्यर्क्षे केशश्मश्रु दिवापयित्वा स्नात्वा [illegible]ते
वाससी परिधायापरे पोपासनाग्निं दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या स
ह प्राणानायम्य देशकालौ संकीर्त्य ममामुकशर्मणः सपत्नीकस्य सर्वपापक्ष
यार्थं श्रीपरमेश्वरप्रीत्यर्थं बोधायनोक्तं गणहोमं सर्वैश्वर्यं संप्राहं करिष्ये॥ इति न
संकल्प्य। ए[illegible]काहं वा संकल्पो तरं वापनं। [illegible]कृदाशायस्तु गृहसिद्धो दने
नैव होमः यज्ञतंत्राये देस्त्वस्मिन्नेवाग्नौ चरुश्रपण[illegible]माऊः अग्निमुपसमाधाय
न्वाधानं भ्रस्य एहीत्यादि प्राणायामांते गणहोमकर्म नियायक्ष्यमाणा॰ ला

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ॰

हस्तं तमुक्त्वा वैशेषिक प्रधान होमे अग्निं घृतौदनेन यक्ष्ये। १ पुरुषं नारायणं च
तौ दनेन ० ५८ अग्निमंहोमुचं घृतौदनेन ० २ इंद्रमंहोमुचं घृतौदनेन ० २ मि
त्रावरुणा वागोमुचौ घृतौदनेन ० २ वायुसवितारा वागोमुचौ घृ० २ अश्विनावा
गोमुचौ घृ० २ मरुत एनोमुचः ० ४ विश्वान्देवानेनोमुचः ० २ अनुमतिं ० २ धनदा
अग्निं वैश्वानरं ० २ द्यावापृथिवी अंहोमुचौ ० २ अग्निं ० २ इंद्रावरुणावंहोमुचौ ० ४
इंद्रावरुणावग्नोस्त्रामं ० इंद्रावरुणौ द्विपात्सु पश्चसुस्त्रामं ० इंद्रावरुणौ चतुष्पात्सु प
भुषुस्त्रामं ० इंद्रावरुणौ गोष्ठे स्त्रामं ० पवमानं सुस्वर्जनं विचर्षणिं पोतारं च ० देव
जनान्मनून्विश्वापूः श्वः जातवेदसमग्निं ० अग्निं ० त्वं सवितारं ० वैश्व देवीं पुन १८
तीं च ० वैश्वानरं वातं मिषिरं मयोभुवं द्यावापृथिव्या तावयों ० सविता रं देवमग्निं च ०
इंद्रावरुणौ गृहेषु स्त्रामं ० इंद्रावरुणावप्सु स्त्रामं ० इं[illegible]रुणौ ओषधीषु स्त्रामं ० इंद्रावरुणौ वनस्पतिस्त्रामं

CC-0. Mrugendra Vinod Collection, Digitized by eGangotri

ब्रह्माणं॰ पावमानीः ६ ब्रह्माणं॰ इंद्रं सुनीत्या सहितं सोमं स्वस्त्या सहितं वरुणं
समीच्या सहितं यमं राजानं प्रमृणाभिः सहितं जातवेदसमूर्जयंत्या स
हितं च॰ देवानादित्यान्॰ अग्निं गार्हपत्यं॰ द्यावापृथिव्यौ सरस्वतीं
च॰ जातवेदसं॰ अग्निं गार्हपत्यं॰ दूरे पश्याः ८ राष्ट्रभृतं च॰ अग्निं गार्ह
पत्यं॰ २ अग्निं॰ अग्निं गार्हपत्यं॰ अग्निं॰ अग्निं गार्हपत्यं॰ अपः शुंधनीः
अपो हिरण्यवर्णाः॰ वरुणं॰ २ अग्नीवरुणौ॰ २ अग्निमपसं॰ अग्निं वै
श्वानरं॰ ८ घृतौदनेन यक्ष्ये॰ वरुणं द्विराज्येनेत्यादि॰ अग्निं स्विष्टकृतं
घृतौदनेन॰ पात्रासादनकाले दर्वीं स्रुवमाज्यस्थालीं चरुस्थालीं
मेक्षणं प्रणीताप्रणयनं प्रोक्षणीपात्रं शूर्पं कृष्णाजिनमुलूखलं मु
सलमिध्मं बर्हिः उपवेषं संमार्गदर्भान् उदकुंभं च॰ प्रणीताः प्रणीता

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हृ॰आ॰

१९ शूर्पे पवित्रे निधाय तूष्णीं चतुरो मुष्टीन् निरूप्य बहुत्वा पपति। प्रोक्षणीः संस्कृत्य
हविः प्रोक्ष्य पात्राणि प्रोक्षति। कृष्णाजिनास्तरणादितंडुलप्रक्षालनांतं तूष्णीं करो
ति। चरुमधिश्रित्य स्रुवं दर्वीं च संमृज्याज्यं निरूप्य। चरुमाज्यं च पर्यग्निकृत्वा परि
धानांते कृत्वा शृतं चरुमभिघार्योदगुद्वास्योद्वासितमभिघार्याज्यास्यार्मध्येन
नीत्वाज्यस्य दक्षिणतो बर्हिषि सादयति। ततः परिषेकादि व्याहृतिहोमांतं कृ
त्वा चरोः शृतमाज्यमानीय स्रुवेण दर्व्यामुपस्तीर्य मेक्षणेन चरोर्हिरवदाय त्रिः
पंचावत्तिनः अभिघार्य हविः प्रत्यभिघार्य जुहोति॥ एवं प्रत्याहुति॥ अग्ने नय॰
विधेम स्वाहा॥ अग्ने यइदं॰ ६ प्रवः शुक्राय॰ जिगाति स्वाहा॥ अच्छा गिरो॰ नु १९

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

षाणां स्वाहा॥ अग्नेत्वमस्मद्युयोध्य० यंजत्र स्वाहा॥ अग्नेत्वं० शंमोः स्वाहा॥ प्रका
रवोमन० घृताचीस्वाहा० ६ सहस्रशीर्षा० गुलं स्वाहा॥ पुरुषायनारायणायेदं० ९
९ पुरुषव्वे० रोहतिस्वाहा॥ एतावा० दिविस्वाहा॥ त्रिपादू० अभिस्वाहा॥ तस्माद्वि०
पुरः स्वाहा॥ यत्पुरुषेण० हविः स्वाहा॥ सप्तास्यास० पुरुषंपशुं स्वाहा॥ तंयज्ञं
बर्हि० पश्चये स्वाहा॥ तस्माद्यज्ञात्सर्वहुतः संभृ० म्याश्चये स्वाहा॥ तस्माद्य
ज्ञात्सर्वहुतऋचः सामा० दजायत स्वहा॥ तस्मादश्वा अ० बयः स्वाहा॥ यत्पु
रुषंव्य० कल्पयेतेस्वाहा॥ ब्राह्मणोस्यमु० अजायत स्वाहा॥ चंद्रमामनसो० मुख
जायत स्वाहा॥ नाभ्या आसीदं० अकल्पयन् स्वाहा॥ वेदाहमेतं० यदास्ते स्वाहा॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

धाता पुरस्ता० विघ्नतेस्वाहा। यज्ञेनयज्ञमय० निदेवाः स्वाहा। १९॥ अग्नेर्म
न्वेप्रथ० मुं चत्वः हसः स्वाहा। अग्नयेंहोमुचइदं०न्यस्येदम्रा० हसः स्वाहा। अ
ग्नयेंहोमुचइदं० इंद्रस्यमन्ये० हसः स्वाहा। इंद्रायांहोमुचइदं। यःसंग्रामंन०
हसः स्वाहा॥ इंद्रायांहोमुचइदं मन्वेवांमित्रावरु०ता नोमुंचतमागसः स्वाहा।
मित्रावरुणाभ्यामागोमुग्भ्यामिदं० यावांरथ ऋजुरश्मिः० तानोमुंचतमा
गसः स्वाहा। मित्रावरुणाभ्यामागोमुग्भ्यामिदं०वायोःसवितुर्वि०गसः स्वा
हा। वायुसवितृभ्यामागोमुग्भ्यामिदं० रथीतमौरथीना०गसः स्वाहा। अश्वि ॥२०॥
भ्यामागोमुग्भ्यामिदं० यस्मात्तंवहतुं०गसः स्वाहा। अश्विभ्यामागोमुग्भ्या

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

उपप्रेष्ठान०वायुसवितृभ्यामागोमुग्भ्यामिदं०२

मिदं॰ मरुतां मन्वे अधि॰ ते नो मुंचन्त्वेनसः स्वाहा। मरुद्भ्य एनोमुग्भ्य
इदं॰ तिग्ममायुधं वीडि॰ त्वेनसः स्वाहा। मरुद्भ्य एनोमुग्भ्य इदं॰
देवानां मन्वे॰ त्वेनसः स्वाहा। विश्वेभ्यो देवेभ्य एनोमुग्भ्य इदं॰ यदि
दं मामभिशोचति॰ त्वेनसः स्वाहा। विश्वेभ्यो देवेभ्य एनोमुग्भ्य इदं॰
अनु नो द्यानुमति॰ मयः स्वाहा। अनुमत्या इदं॰ अन्विदनुमते त्वं॰
रिषः स्वाहा। अनुमत्या इदं॰ वैश्वानरा न ऊत्या॰ वाहसा स्वाहा। अ
ग्नये वैश्वानराये दं॰ पृष्टो दिवि॰ नक्तं स्वाहा। अग्नये वैश्वानरा
य अ प्रथेतामसि॰ ते नो मुंचतं संहसः स्वाहा। द्यावापृथिवीभ्या
मंहोमुग्भ्यामिदं॰ उर्वश्री रोदसी वरिवः कृणोतं॰ मंहसः स्वाहा।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ० द्यावापृथिवीभ्यामंहोमुग्भ्यामिदं० यजेव यंपुरुष० स्वगग्नेस्वा
११ हा। अग्नयइदं० यथाहतद्व० आयुःस्वाहा। अग्नयइदं० यावामिंद्रा
वरुणायत० वतंस्वाहा। इंद्रावरुणाभ्यामंहोमुग्भ्यामिदं० ६ या
वामिंद्रावरुणा सहस्यातनू० यावामिंद्रावरुणा रक्षस्यातनू०
यावामिंद्रावरुणा तेजस्यातनू० योवामिंद्रावरुणावग्नोस्रामि
स्तंवामेतेनावयजे स्वाहा। इंद्रावरुणाभ्यामग्नोस्रामायेदं० यो
वामिंद्रावरुणा द्विपात्सु पशुषुस्रा० यजेस्वाहा। इंद्रावरुणाभ्यां (२१
द्विपात्सुपशुषुस्रामायेदं० योवामिंद्रावरुणा चतुष्पात्सु पशुषु स्रा० १२
यजेस्वाहा। इंद्रावरुणाभ्यां चतुष्पात्सुपशुषुस्रामायेदं० योवा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मिंद्रावरुणागोष्ठेस्वाम: ० इंद्रावरुणाभ्यांगोष्ठेस्वामायेदं ० योवा
मिंद्रावरुणागृहेषुस्वामस्तं ० इंद्रावरुणाभ्यांगृहेषुस्वामायेदं ० योवामिंद्राव
रुणाप्सुस्वामस्तं ० इंद्रावरुणाप्सुस्वामायेदं ० योवामिंद्रावरुणौषधीषुस्वा
म: । ० इंद्रावरुणाभ्यामोषधीषुस्वामायेदं ० योवामिंद्रावरुणावनस्पतिषु
स्वामस्तं ० इंद्रावरुणाभ्यांवनस्पतिषुस्वामायेदं ० पवमान:सुवर्जन: ० पुना
तुमास्वाहा । पवनायसुवर्जनायविचर्षणयेपोत्रेचेदं ० पुनंतुमादेवजना: ०
आयवस्वाहा । देवजनेभ्योमनुष्येभ्योविश्वायुभ्यश्चेदं ० जातवेद:पवित्रे ० त्वं
नुस्वाहा । जातवेदसेऽग्नयइदं ० यत्तेपवित्रमर्चिष्यग्ने ० महस्वाहा । अग्न
यइदं ० उभाभ्यांदेवसवि ० नीमहेस्वाहा । देवायसवित्रइदं ० वैश्वदेवीपुनती
देव्या ० यीण । स्वाहा । वैश्वदेव्यैपुनत्यैचेदं ० वैश्वानरोरश्मि । ० ऐतावराय

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰आ॰
२२

ग्नियेमापुनीतांस्वाहा। वैश्वानरायवातयेषिरायमयोभवेद्यावा पृथिवीभ्या
मृतावरीभ्यांचेदं॰ बृहस्पतिः सविलस्त्वभि॰ हि मास्वाहा। सवित्रेदेवायाग्न
येचेदं॰ येनदेवा अपुनत॰ नीमहेस्वाहा। ब्रह्मणइदं॰ यः पावमानीरध्ये
श्वनास्वाहा। पावमानीभ्यइदं॰ दपावमानीर्यो॰ मधूदकंस्वाहा। पाव
मानीः स्वस्त्ययनीः सुदुघाहिपयस्वतीः। ऋषिहि॰ तंस्वाहा। पावमा
नीभ्यइदं॰ पावमानीर्दिशंतुन॰ समाभृतास्वाहा। पावमानीभ्यइदं॰
॰ वमानीः स्व॰ हि घृतश्चुतः। ॰ हितंस्वाहा। पावमानीभ्यइदं॰ येनदे
वाः पवि॰ तुमास्वाहा। पावमानीभ्यइदं॰ प्राजापत्यंप॰ पुनीमहेस्वाहा।
ब्रह्मणइदं॰ इंद्रः सुनीती॰ पुनातुस्वाहा। इंद्रायसुनीत्यासहितायसोमा
यस्वाहा। सहितायवरुणायसमीच्यासाहितायय मायराज्ञेप्रमृणा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

भिः संहिता य जातवेदस्ते उ जयं त्या संहिताये दं· यद्वा देवहेडनं· मुत स्वाहा।
देवेभ्य आदित्येभ्य इदं· देवाजीवनकाम्याय· मेनेनसं स्वाहा। अग्नये
गार्हपत्यायेदं· ऋतेन द्यावापृथिवी· रिमस्वाहा। द्यावापृथिवीभ्यां
 ःस्वस्ये चेदं स जातशंसा दुत· मुमुग्धि स्वाहा। जातवेदस इदं· य
द्वाचा मनसा· मनेनसं सं स्वाहा। अग्नये गार्हपत्यायेदं· यद्धस्ताभ्यां
चकर· मणा नि स्वाहा। दूरेपश्यायै स्वाष्ट्रभृते प्सरोभ्यश्चेदं· अदो वं
नठ ःय· मनेनसं स्वाहा। अग्नये गार्हपत्यायेदं· यन्मयि माता· अग्नये
गार्हपत्यायेदं· यदापिपेष· अग्न य इदं· यदंतरिक्षं· अग्नये गार्हपत्या
येदं· यदाजगसा· यग्नयेगार्ह· आतिक्रामामि· अग्न ... त्रि ... दंव· अ
ग्नये गार्हप· दिवि जाता अ· अग्न्युपनीभ्य इदं· यदापे नक्तं· अग्न्या

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

२आ०

२३

हिरण्यवर्णीभ्य इदं॰ इमं मे वरुणा॰ वरुणायेदं॰ तत्वायामि॰ व॰ णायेदं॰ त्वंनो
अग्ने॰ अग्नी। वरुणाभ्यामिदं॰ सत्वंन्नो अग्ने॰ अग्नीव॰ णाभ्यां त्वमं॰
अयास्य॰ अयसेग्नय इदं॰ वैश्वानरो न उत्या॰ वातसस्वा स्वाहा। अग्नये वैश्वा
नरायेदं॰ ऋतावानं॰ मीमहे स्वाहा। वैश्वानरस्य दंसनाभ्यो॰ बृहत स्वा
हा। पृष्टो दिवि॰ नक्तं स्वाहा। जातोयदग्ने भु॰ सादानः स्वाहा। त्वमग्ने शो
चिषा॰ महित्वा स्वाहा। अस्माकमग्ने मघ॰ जोतिभिः स्वाहा। वैश्वानरस्य
सुमतौ॰ येण स्वाहा। एता स्त्रुत रसा तसा हुतीरवदानधर्मेण घृतोदनः
हुत्वा वरं ददाति। मेक्षणेनोपपद्यातं जुहोतीति यज्ञतंत्रे। स्विष्टकृदवदा
नस्य दर्व्यां सत्वात्॥ तथा नास्माकं। एतत इमं मे वरुणेत्यादि॰ स्विष्ट॰

२४

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

घागो हुतशेषाद्यदस्य कर्मणे सनेन मंत्रेण। ततः कर्मशेषं समाप्य तत्र। तत
स्थापितमुदकुंभमादाय सपत्नीकः सामास्यं चतुष्पथं गच्छेत्। चतुष्पथं गो
मयेनोपलिप्य तत्रोदकुंभं निधाय प्राङ्मुखः सपत्नीकः तस्मिन्नुदकुंभे आ
त्मानमवेक्षमाणो नुवाकं पठेत्। सिंहे मे मन्युः। व्याघ्रे मे [illegible]रामयः। हर्षे मे
क्षुत्। अश्वे मे घासिः। धन्वनि मे पिपासा। राजगृहे मे शामयः। अश्मनि मे तं
द्रिः। गर्दभे मे रिशाः। शल्यके मे ह्रीः। अश्वत्थे मे वेपथुः। कुर्मे मे गरोगः। वस्ते मे
प सर्पा। अप्रिये मे मृत्युः। भ्रातृव्ये मे पाप्मा। सपत्ने मे [illegible] निर्ऋतिः। उक्षीतौ
मे व्युष्टिः। परस्वति मेऽसमृद्धिः। खड्गे म आर्तिः। गवये [illegible]ध्यं। गोरे[illegible]बाधि
र्यं। ऋक्षे मे शोकः। गोधायां मे स्वेदः। जरायां मे हिमः। कृकलशकुनौ मे भीरुता॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ऊ॰आ॰ ४ गोधायांमे कूद:॥

२४

कशेमे पापांगध:।उलूके मेऽभ्यभवा:।क्रोमई र्ष्या।कर्मेटे मेऽकृसि:।कुललेमेम:

स्या।उल लेमेप्रज्ञा।उष्ट्रे मे तृष्णा।ऋष्टेमेभ्रम:।अव्यामे ...व्या।कोशे मेगंध

कुमार्यांमेलंकार:।सूकरे मे क्रूरत्वं:।प्रदाखुनि मे स्वप्न:।अजगर मेऽ:स्वप्न:।वि

द्युति मे स्मयश:।शारभेमेपाप्मा।लक्ष्मी:।स्त्रीषु मेऽनृतं।अजासु मे कर्कशा:।ब्रा

ये मेई स्या।शूद्रे मे स्तेयं।वैश्ये मे कार्मकृत्यं।राजन्य बंधुनि मे ज्ञानं।नैषादे मे

ब्रह्महत्या।कुलिंगे मेक्षवथु:।उललेमेविलास:।उद्रिणि मे ...मनि:।किंपुरुषे

मेरोद:।द्वीपिनि मे निष्पत्त।हस्तिनि मे किलास:।श्वनि मेऽरिंजा।लापन्दंभु मे

म्ले च्छ:।विदेहेषु गे शीपद्य:।महावर्षेषु मे ग्लै:।मूजवत्सु मे तक्मा।उंडुभो मे का

शिका।इक्ष्वाकुधुरे पित्तं।कलिंगेषु मे मेध्यं।अश्वतर्यांमे प्रजस्ता।पुंश्चल्यां २४

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मेउश्चरित्रं। आखुनिमे दंतरोगः। मक्षिकायां मे श्वल्कशः। शुके मे हरिमा। मयू-
रे मे जल्प्या। वृषे मे जरा। चाषे मे पापवादः। अश्वसु मे तमः। क्रोष्टोस्ते मे किल्विषं।
अपेहि पाप्मन्पुनरपनाशिनो भवानः पाप्मन्सुखे तस्य लोके पाप्मन्नेष्यविहृतो यो
यो नः पाप्मन्न जहाति तमु त्वा जहिः। मोयथमन्यत्रास्मन्निविशतां सहस्राक्षो
अमर्त्यः। यो नो द्वेष्टि स सखेदतु। यमु द्विष्मस्तमु जहि। ततस्त आपो नेक्षतां। दश मु-
त्सिंचति। दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं द्विष्मः। परास्य पात्रं अनवेक्ष-
माणा आयंति। हस्तपादान्प्रक्षाल्य गृहं प्रविशंति। ततः कूर्मसाकुण्याय विष्णु-
स्मृत्वा कूश्मांडहोमवद्भूतं कुर्यात्। एवं प्रकारेण सप्ताहं त्रिषवणं गणहोमं कु-
र्यात्॥ इति बौधायनोक्तो गणहोमः॥ ॥अनेन प्रकारेण अश्रु सुतं स्नुतं सु-
तं वा प्रायश्चित्तं कृत्वा शुद्धो भूत्वा शुभदिने अरणीउत्लक्षणोक्तं हरेत्सम्यक्॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आरोगणेशं संपूज्य पुण्याहं वाचयित्वा ग्रामात्प्राचीमुदीचीं वा दिशं गत्वा शमीगर्भमश्वत्थं अशमीगर्भं वाशुष्कं कुरं वा स्वशान्त्यनुपहतं अंत्यजाद्यनुपहतं वैश्वानरसूक्तेन प्रदक्षिणीकृत्य तेनैव सूक्तेन प्रणम्य तस्य प्राग्दिक्स्थां प्रागग्रां उदग्दिक्स्थां उदगग्रां वा स्थूलामरणीकार्यसमर्थां असुषिरां पश्चादिना प्रादक्षिण्येन छित्वा भूमौ पतितायाः शाखायाः योधोभागः स एवारण्यधोभागः यऊर्ध्वभागः तयोश्चिह्नं कृत्वा मूलभागस्याधरारणिं तदग्रभागस्योत्तरारणिं च छित्वा तक्ष्णेन चतुरस्रे कृत्वा यथा पादनं न भवति तथा शोषयेत्। तत्रारण्योर्मानं तु आचार्यैर्नोक्तं। तयोर्यावज्जीवधारणविधानाद्यावत्प्रयोजनं तावत्स्यो ग्राह्ये। अनुक्तमन्यतो ग्राह्यमिति न्यायात्। सूत्रांत

स एव उर्ध्वभागः ४

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

रोक्तं मानं ग्राह्यं। तदुक्तं बौधायनेन। चतुरंगुलोत्सेधां द्वादशांगुलविस्तीर्णां षो
डशांगुलायामामपि वा प्रादेशमात्रीं सर्वतः समां चतुरंगुलोत्सेधामेवमुत्त मेव
रारणिमिति। चतुर्विंशत्यंगुलायामां षडंगुलविस्तीर्णां चतुरंगुलोत्सेधामेवं
मुत्तरारणिमिति। कात्यायनस्तु। चतुर्विंशत्यंगुला वैश्वानरस्तु विज्ञरेणा
द्वा। शमीगर्भमश्वत्थं यद्यशमीगर्भं शुष्कं कुरमशानिशाय्यनुपहतमन्य
दग्न्यंशाखबहुच्छ्रमशीर्णमं स्वजनानुपहतं गत्वा वैश्वानरसूक्तेन प्रद
क्षिणं कृत्वा प्रणमेत्तेनैव प्राचीमुदीचीं वा शाखां प्रागादि प्रदक्षिणं छि
दपिला प्रा[illegible]या मुदग्यां वाधोभागेनाधरामरणीं त्वपार्श्वोर्ध्वभागां विश
तत्य चंविशेषितां चतुर्विंशत्यंगुलायतामष्टांगुलविस्तारां चतुरंगुलोन्न

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ॰ प्र॰
२६

नां तथोत्तरभागे नोत्तरारणिं च गायत्र्याथ करोति। तत्र प्रथमानियानि चत्वार्यंगुलानि शिरश्चक्षुः श्रोत्रमास्यं च द्वितीयानियानि ग्रीवा वक्षो हृदयं स्तनस्तृतीयां न्युदरप्रभृति चतुर्थानि श्रोणी पंचमान्युरू षष्ठानि जंघे पादावित्येके एवमरणी सर्वैरंगैः संपूर्णो भवतो यच्छीर्षं मंथति शिर्षक्तिमान्य जमानो भवति। यद्ग्रीवायाम वेपनोमल्लमंथेदनारब्धो स्य यज्ञो भवत्युरूरक्षसां योनिर्जंघे पादो पि शाचानां श्रोणी देवानां योनिस्तस्मा च्छ्रोण्यामेव प्रथमं मंथेन्मूलाष्टांगुलां गुलं परित्यज्याग्रे च द्वादशांगुलं पार्श्वयोस्त्रीणि त्रीण्यंगुलानि प्रथममंथन एवं प्रजननं भवेत् ततोत्तरारण्ये रष्टांगुलपरिणाहं प्रथमं चीत्वां मंथमूले संधत्ते तेन सहितः षट्त्रिंशदंगुलाय तो मंथो भवति तथा छिद्रमित्युक्तं प्राकृशिरारणिस्तं वा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

वेदिविति। यंत्रविधिर्यज्ञपार्श्वपरिशिष्टे। अष्टांगुलः प्रथमःस्याच्चात्रस्याद्द्वादशांगुलं॥ ॐवलीद्वादशेवस्यादेषयंत्रविधिस्मृतः। उत्ताना प्राकुशिरावेदिर्यथाविदिस्तथारणिः। अध्वर्युः प्राङ्मुखोमंथेप्रत्यगास्तरणाहिंसा। प्राङ्मुखोदिततोयज्ञः प्राङ्मुखेनैवहूयते। प्राकुप्रणीतानिपात्राणि तस्मात्प्राङ्मथीयते। अनुलोमाभवेद्योनिः पार्श्वभेदोनविद्यते। अनुलोम्येनजनितः सर्वान्कामान्प्रयच्छति। मूलादष्टांगुलंत्यक्त्वा अग्राच्चद्वादशांगुलं अंतरादेवयोनिःस्यात्तत्रमथ्योहुताशनः नान्यवृक्षेणमंथ्नीयात्नकुर्याद्योनिसंकरं योनिसंकरसंकीर्णाद्वियोनिंयांतितेतेद्विजाः॥ तस्मादेकवृक्षजेअरणीकार्येवृक्षभेदस्तुनकर्तव्यः तत्रदोषश्रवणात्। अश्वाचयदिरुह्येतगर्दभे

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ·
१

नकदाचन यावज्जीवं नैव गर्भस्ताद्गोऽग्निवियोनिजइति केदितास्फटि
ताश्चैव सुषिरायं थिसूच्छिता॥ चतुर्विधारणीत्याज्याश्रेयस्कामैर्द्विजातिभिरि
ति॥ मंत्रवदुद्धरणं तु संकल्पोत्तरमेव इति अरण्याहरणं तल्लक्षणं च। अत्रै
व पात्रकरणं। अरणीकरणसमय एव तंते हरामि ब्रह्मणा यज्ञियैः केतुभिः
सहेति मंत्रलिंगात्। आधाने ष्टिष्ववश्यमपेक्षितत्वात्। आधानप्रभृति या
वज्जीवं पात्राणि धार्यंत इति परिभाषासूत्राच्च अथ पात्रलक्षणं तत्सूत्र
प्रथमप्रश्ने स्फ्यं कपालान्यग्निहोत्रहवणीं शूर्पं कृष्णाजिनं शम्यामुलू
खलं मुसलं दृषदमुपलां खादिरं स्रुवं पालाशीं जुहूमाश्वत्थीमुपभृतं वै २७
कंकतीं ध्रुवामरत्निमात्र्यो बाहुमात्र्योवा मुखवत्यो हः समुखप्रसेचनाः

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ज्ञाग्रा भवंति त्वक्कृतो बिलावा यस पुछ इत्येकषां हस्त्यो ष्ठ इत्येकेषां आ… लीकुटरुं पात्रीमेक्षणं वेदं प्राशित्रहरणं प्रणीता प्रणयन मिडापात्रं चैकाम न्वाहार्य स्थालीतेषां यान्यना दिष्टवृक्षाणि विकंकतस्य तान्य होमार्थानितु वारणस्येति। ऐष्टिकपात्राणां इयत्ता लक्षणं चोक्तं॥ चकारादार्थिकान्यु… र्तव्यानि। तन्मध्ये केषांचिदाकृतिर्मानं च प्रसिद्धत्वात्सूत्रकृन्नोक्तवान्। तत्सू त्रांतरस्थं ग्राह्यं। स्फ्योरत्निमात्रो वारणः खड्गाकारः। खादिर इति सूत्रांतरं॥ कपालानि तु नवं मृण्मयं घटं भित्वा तच्छकलानि पुरोडाशश्रपणयोग्या न्यष्टादिसंख्याकैरश्वशफमात्रो विस्तारः। संपद्यते नावन्मात्राणि। येपार्श्वेतु। स मानि चतुरस्राणि द्व्यंगुलानि सन्ति ततः। कुर्यादेककपालानां कपालं पाणि

ग्आ॰ संमितं द्विकपालत्रिकादीनि कुर्यात् ...शनुसारतः। एवमादि समादेशं कुर्यादोस्त्र
२८ र्गिकं सदेति। अग्निहोत्रहवणी वैकंकती स्रुक् ध्रुवाकारा अग्निहोत्रहोमार्था। शू
र्पं वैणवं नलमयं एषीकं वा। लोकप्रसिद्धं। कृष्णाजिनं कृ...ग चर्म ग्रीवाभा
सप्रदेशासहितं सलोम। शम्या बाहुमात्रायता द्वादशांगुला ...वा षट्त्रिं
कृतिं शदंगुला पता वाग्र प्रदेशं कुब्जा। मूलप्रदेशा सूक्ष्मा खादिरी वैकंकती वारणी वा।
उलूखलं वारणं दारुमयं व्रीहिकंडनसमर्थं। अरत्निमात्रायामं पृथुबुध्नं मध्य
संनतं लोकप्रसिद्धं। मुसलं द्विगुणायामं तद्दारुमयं अवहननसमर्थं। दृषदु
तंडुलपेषणार्थं आधारभूतो विस्तृतो मूलायां निह्नितो लोकप्रसिद्धश्च पाषाणः २८
उपलापेषणयोग्यो वर्तुलो दृषदि स्थाप्या मो लोकप्रसिद्धः पाषाण...रि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

तनः। खादिरः स्रुचोरत्निमात्रोंगुष्ठपर्वमात्रवृत्तविलो यो मूलदंडः। जुहूः
अरत्निमितकाष्ठस्य पंचधाभक्तस्य मूलतस्त्रिभागदंडाच्चतुर्थभागे त्र्यंगुलखात
वृत्तबिला पंचमभागासेचनाहंसमुखमसेचनाहस्योष्ठी वा वायसपुच्छी वा।
बाहुमात्र्यां तु दंडस्यैव वृद्धिः। एवमाश्वत्थ्युपभृत्। तथा वैकंकती ध्रुवा। आप
स्तंब स्रुवादिराघन्यतरवृक्षस्य सस्रुवा स्रुचः कार्या इत्याह। आज्यस्थाली
मृन्मयी इष्टिपर्याप्ताज्यधारणसमर्था पृथुमुखी। कुरुटः समाहननसमर्थः
पाषाणः। पात्री पिष्टसंवपनसंयवनार्था मृण्मयी तैजसी वा महती विस्ततमु
खा। मेक्षणं वारणमरत्निमात्रं। चतुरंगुलविस्तृताग्रं दर्वीसदृशं पिष्टसंयवना
र्थं। प्राशित्रहरणं वारणं गोकर्णाकृ स्यस्व कर्णाकृत्या दर्पणाकृति वा चतुरस्रं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰ भा॰

लदंडः प्रादेशमात्रं दीर्घं। प्रणीताचमसो वारणः प्रादेशमात्रश्चतुरस्रः। चतुरंगु
२९ लखातः बिलश्चतुरंगुलदंडः। चमसानां तु वक्ष्यामि दंडास्युश्चतुरंगुलाः॥ त्र्यंगु
लं तु पार्श्वेषु स्यात् संविस्तारश्चतुरंगुलः॥ विकंकता अतिश्लक्ष्णास्त्वग्बिलाश्चमसाः स्मृ
ता इति यज्ञपार्श्वे। इडापात्रं अरत्न्यायतं प्रसृतांगुलिपादविस्तृतं चतुरंगुलखा
तबिलं चतुरंगुलदंडं। अन्वाहार्यस्थाली महती मृन्मयी ताम्रमयी वा। आर्थिकान्नु
ध्यंते। मदंति स्थाली संयवं न्यसापनार्था॥ योक्त्रं पत्नीसंनहनार्थो रज्जुर्मौंजी अ
न्यतरतः पाशवती। वेदस्तत्कालकृतो दर्भमयः प्रसिद्धः। उपवेषः शाखामूलप्रदेशं
कृतोंगारनिबर्हणार्थः काष्ठांतरस्य तत्कालकृतो वा॥ सान्नाय्यपात्राणि कुंभ्यो मृ
न्मय्योऽष्टौ दोहनं दारुमयमयोमयं वा॥ तथैवापिधानं॥ ॥ इति पात्रलक्षणं॥ अ २९
थ शालाकरणं॥ प्राग[illegible]वंशा[illegible]वंशानाम[illegible]वर्तन्या॥ तस्याः द्वारद्वयं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

दक्षिणतः पुरस्ताद्वा। तस्याः पूर्वार्धे विहारः॥ शालामानं तु बौधायन आह। दश प्रक्रम
विस्तारां द्वादश प्रक्रमायतां॥ शालां कृत्वा विहारस्तत्राग्न्याधेयिकः स्मृत इति॥ अ
त्र द्विपदः प्रक्रमः। आचार्भिर्योप्रायस्तः एकस्यामेव महत्यां शालायामगारद्व
यकल्पनं॥ तथा गार्हपत्यागारं महत्॥ अस्मिन्नेव दक्षिणाग्निः॥ तस्यागारा
त्तुक्तेः॥ बाह्यत इतरयोरिति सभ्यावसथ्ययोर्बहिः प्रवणा च॥ शालाक
रणं वास्तुशमनं च शालां करिष्यन्नित्यादि गृह्यसूत्रोक्तप्रकारेण कर्तव्यं।
तत्र भूसाम्यं प्राचीसाधनं च सूत्रोक्तप्रकारेण ज्योतिःशास्त्रोक्तकोशेरेण वा कुर्या
त्॥ इति शालालक्षणं॥ अथ विहारः॥ शालायाः पूर्वेण मध्यमं वंशं ब्रह्मसौ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

दृनि काम्ररूपलमनशेष्यगार्हपत्यायतनं कुर्यात्॥ आयतनमानं पिशिलमात्रं॥
धिष्ण्यानां पिशिलमानत्वात्॥ अरत्निमात्रं पिशिलमिति पक्षमाश्रित्य लिख्य
ते॥ शुभदिवसे गणेशं संपूज्य पुण्याहं वाचयित्वा॥ भूमिं संपूज्य शंकुं धुरं ज्वां च वि
श्वकर्माणं पूजयेत्॥ ततः कॢप्तायां शालायां मध्यभाग एव आंतात्॥ प्राक्सूत्रं दी
र्घं कल्पयेत्॥ तत्र विहारसूत्रं॥ अथाग्न्याधेयिके विहारे गार्हपत्याहवनीययोरंत
राळे विज्ञायते अष्टासु प्रक्रमेषु ब्राह्मणोऽग्नीमादधीतैकादशसु राजन्यो द्वादशसु
वैश्यश्चतुर्विंशत्या मपरिमितं यावता वा चक्षुषा मन्येत तस्मान्नातिदूरमाधेयं इति
सर्वेषामग्न्यवयवेनश्रूयते दक्षिणतः पुरस्ताद्धि तृतीयदेशेने दायस्य गार्हपत्य
स्य दक्षिणाग्ने विज्ञायते गार्हपत्याहवनीययोरंतराळं पंचधा षड्धा वा संभु ३०
ज्य षष्ठं सप्तमं वा भागमागंतुकमुपसमस्य समं त्रैधं विभज्यापरस्मिंस्तृतीये ल

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

क्षणं करोति गार्हपत्याहवनीययोरंतौ नियम्य लक्षणेन दक्षिणापायस्य नि-
मित्तं करोति दक्षिणाग्नेरायतनं श्रुतिसामर्थ्याद्यजमानमात्र्या वा प्राच्यपरि-
मिता वा यथा सन्नानि हवींष्यपि संभवेयुरेवं। तिरश्चीं प्राचीं वेद्यर्धं साधु परस्य
भित्वाहवनीयमंतरा श्रोणी अभिगार्हपत्यं मध्ये संतत्य तत्रैव मिथो हियो-
रेति। शास्त्रिक्या वेदेर्विज्ञायतेऽपरेणाहवनीयं यजमानमात्रं दीर्घचतुरस्रं वि-
हृत्य तावतीं रज्जुमस्योभयतः पाशां करोति मध्ये न लक्षणं दक्षिणयोः श्रो-
ण्यंसयोरंतौ नियम्य लक्षणेन दक्षिणापायस्य निमित्तं करोति रज्जुं नियम्या-
तौ समस्य दक्षिणस्याः श्रोणेर्दक्षिणामंसमालिखेदेवमुत्तरस्त्रिपर्यमाली [illegible]
गुणां तथा कृत्वा पश्चात्पुरस्ताच्चोपारालिखेद्विमितायां पुरस्तात्स[illegible]मान्या
नुपसंहरेच्छ्रुतिसामर्थ्यादिति। प्रा[illegible]स्य प्रत्यग्भागे [illegible]ओदनिका[illegible]प[illegible]

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०

मवशेष्य गार्हपत्यपाश्चात्य शंकुं निखनेत्। ।ततः पिशिलमात्रे पौरस्त्य शंकुः। ।पिशिलम
ात्रां रज्जुं द्विरभ्यस्योभयतः पाशावतीं कृत्वागन्तुकां रज्जुपाशान्तः पिशिलार्धे
लांछयेत्। ।आगंतुकरज्जुपाशं पूर्वशंकौ प्रतिमुच्यापरे पाशं प्रत्यक्शंकौ। ।
ततः सार्धार्धपिशिललांछनं गृहीत्वा दक्षिणत आकृष्य पिशिलार्धनिके शं
कुं निखनेत्। ।एवमुत्तरत आकृष्य शंकुं निखनेत्। ।तौ पूर्वकोणशंकू। ।रज्जु
व्यत्यस्य तथैव दक्षिणतश्चोत्तरतश्चाकृष्य शंकुं निखनेत्। ।तौ प्रत्यक्को
णशंकू चतुर्षु शंकुषु प्रतिदिशं सूत्रपातेन पिशिलमात्रं समचतुरस्रं भवति
चतुरस्रमध्य एव दक्षिणशंकुं निखनेत्। ।तस्मिन् पाशं प्रतिमुच्य रज्जुं कोणपा २२

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

शंकौ नीत्वा तत्र चिन्हयेत्॥ तामेव रज्जुं पूर्वशंकौ नीत्वा ऽयशिष्ट रज्जुतृतीयांश स
हितेन पिशिलार्धेन श्रोणिं मयेत्त्वं दक्षिणां तं गार्हपत्यास्पतनं। गार्हपत्याय
तनपूर्वरेखातः॥ प्राक् अष्ट सु प्रक्रमेषु आहवनीयमत्य कृशा कुः॥ शंकोर
परिमितां रज्जुं पंच धा षोढा वा संभुज्य षष्ठ सप्तमं वा भागमागं तु कं मुपूर्व
मस्याभ वयतः पाशा रतीकृत्वा पुनस्त्रेधा विभज्य मध्य भागं नौ लांछये
रज्जु पाशो गार्हपत्य मागे रेखास्य शंकौ आहवनीयमत्य कृशंकौ प्रति
मुच्य पूर्वचिह्नेन दक्षिणान आकृष्य तत्र शंकुः तद्यजमानसदनं॥ प्र
त्यक् पूर्व चिह्नेन दक्षिणन एव कृष्य तत्र शंकुः स दक्षिणाग्नि वृत स्य मध्य

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

३२

शंकुः। तेनैव चिह्नेनोत्तरतआहृष्यशंकुस्तद्दोर्नुः स्थानं पूर्वचिह्नमुत्त-
रतआहृष्य समुत्कर्षः। पिशिलमितां रज्जुं पाशवतीं कृत्वा गार्हपत्यश-
कौ पाशं प्रतिमुच्य रज्जुं चतुरस्रकोणेनात्वाऽधिकां रज्जुं त्रेधा विभज्य तृ-
तीयांशसहितां क्षेत्रान्तर्गतां रज्जुमुभयतः पाशिनीं कृत्वा दक्षिणाग्नि-
हृत्तमध्यशंकौ एकं पाशं प्रतिमुच्य द्वितीयेन मंडलं परिलिखेत्। मंडलस्य
दक्षिणार्धं ज्यासंपातेन दक्षिणाग्न्यायतनं। उत्तरार्धमुत्सृजेत्। आ-
हवनीयस्य कुशंकोः प्राक्पिशिलमात्रे शंकुः। तयोः शंकोः रज्जुं ध्वे- ॥
ध्येन गार्हपत्यचतुरस्रवच्चतुरस्रं कुर्यात्। तदाहवनीयायतनं। सम-

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

न्ततः कुंडे मेखला चतुरंगुलविस्तारा द्वादशांगुलोछ्राया अष्टांगुलो
छ्राया वा। द्वितीयमेखलापक्षे चतुरंगुलविस्तारमध्यएवं बाह्यमेखले।
त्र्यंगुलविस्तारा षडंगुलोछ्राया चतुरंगुलोछ्राया वा। अयं श्रंगादंतपक्षः॥
मध्यान्मध्यपक्षे तु दक्षिणाग्निशंकुतउत्तरतः पंचांगुलउत्तमध्यशंकुः॥ स
दक्षिणाग्न्यायतनस्य प्रांतशंकुः॥ अपरेण आहवनीयं यजमानमात्री वेदिः। घ्रीयाव २
र्योलिरश्मीमध्यसन्नता अण्वंसा दक्षुश्रोणी कार्या। साग्न्याधेयिकी दार्श
की च भवति तस्यास्तिर्यङ्मानं याज्ञिकाः द्विविधं कुर्वंति। आयाममितां र
१ ज्जुं द्वैधा विसृज्य तावतः पंचांशान् संवर्ध्य तां रज्जुं उभयतः पाशिनीं कृत्वा
त्रयोदश चतुर्दश पंचदश भागांतेषु चिह्नं कुर्यात्। आद्यपाशं आहवनीयपार्श्वा।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

स्यशंकौ प्रतिमुंच्य आगंतुकभागांस्तपाशं पस्य कुशंकौ त्रयोदशभागांते चिह्नं
दक्षिणत आकृष्य चतुर्दशांते चिह्ने शंकुः ॥ एवमुत्तरतः ॥ ते वेदिश्रोणी ॥ पृष्ठ्यंस्य स
स्य प्रंसपाशं पूर्वे शंकौ अपरपाशं पस्य कुशंकौ च प्रतिमुच्य पूर्ववत्त्रयोदशांत
चिह्नेन दक्षिणत आकृष्य पंचदशांते चिह्ने शंकुः एवमुत्तरतः ॥ तावंसौ ॥ अने
न प्रकारेण कर्तव्यौ । अत्र फलितोऽर्थः ॥ षट्त्रिंशदंगुला पश्चात्तिरश्ची
द्वात्रिंशदंगुला पुरस्तात्तिरश्ची ॥ प्रकारांतरं च ॥ आयाममितां रज्जुमुभयतः पा
शवतीमष्टधा विभज्य आद्यपाशतः अंशत्रयांते चिह्नं कृत्वा त्रिभागमितां रज्जुं
द्विगुणीकृत्य मध्ये चिह्नं द्वितीयं उभयचिह्नमध्यगतां द्विगुणीकृत्य मध्ये चि
ह्नं चैषण्णवत्यंगुलमिता रज्जुः पाशतः अष्टादशांगुले सप्तविंशत्यंगुले षट्
त्रिंशदंगुले च चिह्नत्रयवती भवेति ॥ ततः पृष्ठ्यासूत्र एव वेद्यायाममध्ये शंकुः ॥ ३३

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

एवंशंकुत्रयं। आयामपाशं प्रत्यक्शंकौ अंसपाशं मध्यशंकौ प्रतिमुच्य आयम्य प
शातः षाट्त्रिंशदंगुले चिह्नेन दक्षिणत आकृष्य सप्तविंशसंगुले चिह्ने शंकुः।
एवमुत्तरतः। ते श्रोणी। प्रत्यक्शंकुतः पाशं निष्काश्य तं पाशं पूर्वशंकौ प्रतिमुच्य अष
ट्त्रिंशदंगुले चिह्ने दक्षिणत आकृष्य अष्टादशांगुलचिह्ने शंकुः। एवमुत्तरतः।
तावंसौ। एवं प्रकारेण चतुःपंचाशदंगुला पश्चात्तिरश्ची षट्त्रिंशदंगुला पुरस्तात्ति
रश्चीति फलितोऽर्थः। तृतीयोऽपि प्रकारो बौधायनोक्तः। चतुःपंचाशदंगुला पश्चात्ति
रश्ची। अष्टाचत्वारिंशदंगुला पुरस्तात्तिरश्चीति। वेदिपार्श्वस्थशंकौ दक्षिणत
उत्तरतश्च द्वात्रिंशद् द्वात्रिंशदंगुले च। शंकू। ते श्रोणी। वेदिमध्यशंकुतो दक्षिणत
उत्तरतश्च चतुर्विंशत्यंगुले शंकू। तावंसौ। सप्तमनप्रकारस्तु दक्षिणश्रोण्यं
सशंकुमध्यमितां रज्जुं द्विरभ्यस्य उभयतः पाशिनीं मध्यचिह्नवतीं कृत्वा दक्षिणश्रो
ण्यंसशंक्वोः पाशौ प्रतिमुच्य मध्यलक्षणेन दक्षिणत आकृष्य तत्र दृढशंकुं निरस

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

नेद्वा। तस्मिन्रज्जुं प्रतिमुच्य अंसपाशं श्रोणिपाशे समस्य पाशद्वयसहितं
श्रोणिशंकुमुन्मुच्य तेन दक्षिणांसपर्यंतं परिलिखेत्। एवमुत्तरतः। श्रोणि
द्वयशंकुमध्यमितां रज्जुमुभयतः पाशिनीं कृत्वा श्रोणिशंकोः पाशौ प्रतिमु
च्य लक्षणेन रज्जुं पश्चादाकृष्य पूर्ववद्दक्षिणश्रोणितदुत्तरश्रोणिपर्यंतं परि
लिखेत्। एवमंसद्वयशंकुतः प्राक्विक्रमात्कृष्य पूर्ववद्दक्षिणांसतदुत्तरां
सपर्यंतं परिलिखेत्। यदा दक्षिणोत्तरा भूमिरल्पा तदा सन्नमनमग्नगारउ
च्यते। श्रोण्यंसशंकुमध्यमितां रज्जुं द्वादशांशेन संवर्ध्य उभयतः पाशिनीं कृत्वा
श्रोण्यंसशंकुतो दक्षिणतस्तदुत्तरतश्च बहिः रज्जुसंवर्धनमानेन शंकुचतुष्टयं नि
खनेद्वा। रज्जुपाशौ बहिःशंक्वोः प्रतिमुच्य रज्जोर्मध्यं तरावकर्षणेन श्रोण्यंस
पर्यंतं परिलिखेत्। एवमुत्तरतः। यदा स्वल्पं सन्नमनं तेव्यंतरा रज्जुसंव ३८

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

र्धनं स्वल्पं स्ववर्धनमानेनैव बहिः शंकुनिखननं॥ ॥इति शिद्धारः॥ अथाधा
नात्पूर्वेद्युर्दिने तत्कर्मी संभारोपकल्पनं तेच संभाराः॥ सिकता। ऊषा। आखूत्करं।
वल्मीकवपा। सूद। वराहविहत। पुष्करपर्णं। शर्करा। रजतशकलानि। अ
श्वत्थ। उदुंबर। पलाश। शमी। विकंकत। अशनिहत। सिकता। क्षुद्रस्था
नगतमत्पांसवः। ऊषा। क्षारमृत्। आखूत्करं आरण्यमूषकोत्खात
मृत्। वल्मीकवपा आरण्यपिपीलिका भिरुत्खातरचितोर्ध्वमृत्‌। भा
षया वारोळ इति प्रसिद्धं। सूदः ह्रदमृत्। वराहविहतं वन्यवराहरेखा
तामृत्। पुष्करपर्णं कमलिनीपर्णं। शर्करा। नदीतीरस्थाः क्षुद्रपाषा
णाः। शकलानि प्रसिद्धानि। अश्वत्थादीनां पल्लवा एव। विकंकतः सुनवी
ति प्रसिद्धः संकटकवृक्षः। अशनिहतो विद्युद्धतो वृक्षः। तस्य काष्ठश

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

श्रा
३५

कलानित्तगादिवा किं, चित्त। स्रुद्राभावे कुळीरसुषीरमृत्तस्रासा। अश्वनिहताभ्मा
वि वायुहतो आद्यः। तत्र सिकताद्याः षट्शर्कराश्चेति पार्थिवाः सप्त पुष्करपर्ण
अश्वत्थाद्याः षडिति वानस्पत्याः सप्त। पंच पंच पक्षे उभयत्रां स्युतानि वृ
निः। इति संभाराः॥ ॥अथोपयोक्ष्यमाणपदार्थोपकल्पनं। विज्ञिय
श्वत्थस्याद्रो मुकुलवती स्त्रिस्रः प्रादेशमात्रीः समिधः चित्रियालक्ष्यणप
ग्रामसं। मादिलक्षकः उच्चइस्यर्थः। नव अश्वत्थीः प्रादेशमात्र्यः समिधः
द्वादश शमीमय्यः। तिस्र औदुंबर्यः। तिस्रो वैकंकत्यः। सभ्यावसथ्यपक्षे
आश्वत्थ्यः पंचदश। शमीमय्यो ष्टादश। औदुंबर्यः पंच। वैकंकत्यः पंच।
पाञ्जकः पड्ळकः पलाशशाखा। अद्भिः। उपयमनार्थं सिकताः पात्र
सहिताः। प्रणयनीयायाज्ञिककाष्ठध्मः। सर्वौषधं। व्रीहियवतिलमा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

षमुद्गगोधूमकुलित्थाः सप्तग्राम्याः। श्यामाकनीवारजर्तिलगवेधुकगा
र्मुतवेणुयवकुरुविंदाआरण्याः सप्त हिरण्यकं॥ कल्माषमजं रथं रथचक्रं
वा॥ अम्भौनिद्वा। नजः कमंडलुर्वा। वरचतुष्टयं। मिथुनावसिक्तरेतसोगाले
क्षौमे वाससी। सांतिकूर्चजनसामग्री। यज्ञीयवृक्षशल्कानि। यंत्रकरणार्थं
शस्त्रं। मंथनार्थं रज्जुद्वयं। शरावं। क्लेदनार्थं पयः। आज्यस्थाल्याद्यर्थं म
न्मयानि मृण्मयपात्राणि च। एते पदार्था उपकल्पनीयाः॥ ॥ॐ अथ प्रयोगः॥ ब्र
ह्मौदनदिनात् पूर्वदिने स्मृतिप्राप्तं पुण्याहवाचनं अंकुरार्पणं च आचारप्राप्तं
रक्षशांतिं प्रतिसरबंधं च कुर्यात्॥ तत्रांकुरार्पणसूत्रं बोधायनीयं॥ अथातो
ऽकुरार्पणविधिं व्याख्यास्यामो ब्राह्मणान्नेन परिविष्य पुण्याहं स्वस्त्ययनमृ
द्धिमिति वाचयित्वा। शुचौ देशे गोमयेन गोचर्ममात्रं चतुरस्रं स्थंडिलं कृत्वाऽक्ष

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ॰

तान्संमकीर्योङ्कुरमुष्य पंचपालिकासौवर्णरजत ताम्रमृन्मयं वा यथा-
संभवं गृह्णाति॥ मध्ये चतुर्मुखं विंद्यात्पूर्वे वज्रिणमेव च। दक्षिणे तु यमं विं-
द्यात्पश्चिमे वरुणं तथा॥ उत्तरे शशिनं विंद्यात्पालिकास्थापनक्रमः। वल्मीकमृ-
त्तिकामश्वगोमयं चतथैव च॥ संयुज्य प्रक्षिप्तासु पालिकासु यथाक्रमं॥
दूर्वामश्वत्थपत्रं च शिरीषं बिल्वपत्रकं॥ तासु मूलेन बध्नीयात्कृतसूत्रेण वे-
ष्टयेत्॥ मध्यमायां आहुतिभिर्ब्रह्माणमावाहयामि॥ ॐ भूर्ब्रह्माणमावा-
हयामि॥ ॐ भुवश्चतुर्मुखं ब्रह्माणमावाहयाम्योऽं स्वः प्रजापतिं ब्रह्माण-
मावाहयाम्योऽं भूर्भुवः स्वर्हिरण्यगर्भमावाहयामी स्वावाह्य ताभिरेव प्रा- २५
च्यां वज्रिणं शचीपतिमिंद्रं शतक्रतुमिस ताभिरेव दक्षिणस्यां यमं वैवस्वतं पि-
तृपतिं प्रेतपतिमिस ताभिरेव प्रतीच्यां वरुणं प्रचेतसं तु रूपिणमपांपतिमि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

सेताभिरेवोत्तरस्यांशशिनमिंदुं निशाकरं सोम॥ इत्यनेनाप्यस्यापोहि
ष्ठा मयो भुव इति। तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमा
नः सुवर्जन इत्येतेनानुवाकेन मार्जयित्वाथैनानभ्यर्च्य गंधादिभिर्मुष्मै नमो
मुष्मै नम इत्यथैनाननुप्रतिष्ठते। दिशांपतीन्नमस्यामि सर्वकर्मफलप्रदान्। कु
र्वंतु सफलं कर्म कुर्वंतु सकलं शुभमिति आहिताग्निरेवमुद्धृत्य सर्षपान् मिश्रां द
क्षीरेण प्रक्षाल्य यथाक्रमं निवपति। ब्रह्म जज्ञानमिति द्वाभ्यां मध्यमायां। यत
ट३ इंद्र भयामहे स्वस्तिदा विशस्पतिरिति द्वाभ्यां प्राच्यां। योस्य कौष्ठ्य जगत इति द्वा
भ्यां दक्षिणस्यां। इमं मे वरुण तत्त्वा यामीति प्रतीच्यां। सोमो धेनुमिति उत्तरस्यां।
यथाक्रमं शुक्लाभिः सिकताभिः प्रच्छादयेत्। पंचगव्येन यथाक्रमं सेचयेत्।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

प्रणवेनैवापिधानं कृत्वा यावत्कर्म तावत्सुरक्षितं गोपायेत्। समाप्ते कर्मणि

देवता यथाक्रममुद्वासयेत्। आ सप्तमात्पञ्चमाद्वा आ सप्तमात्सुमनाः फलं प्र

निभक्तिकामानां विष्णोः सर्वोत्सवनस्तथा। चतुर्थे चाङ्कुरान्कुर्यात्पापायां जायते त्वसः

त्र्यहे सर्वकामानां सद्योऽङ्कुरानर्पयेदित्याह भगवान्बोधायनः। इति कृतनित्यक्रि

यः कुम्भान्ब्राह्मणानाहूय विशिष्टब्राह्मणानुज्ञां लब्ध्वा तैः सह पत्नीकः शुभ्रस्थले

प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य गृहीनाधास्यमानः

कर्मसाफल्यार्थं बौधायनोक्तप्रकारेण पुण्याहवाचनपूर्वकं अङ्कुरार्पणं करि

ष्ये। तत्रादौ गणपतिपूजनं करिष्ये। इति संकल्पं कुर्यात्। ... स्वस्त्यस्तु त्वा ... सर्वा

गानां ... रात्रौ ... उदक ... ति ... कलश ... चतुर्थी ... दानकहानि प्रातः क

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

त निसक्रियः अग्न्याधानागारं गोमयेनोपलेपयित्वा तोरणादिनालंकृत्य शिष्टा
न्ब्राह्मणान्त्विजश्चामंत्र्य इष्टदेवादीन्वृद्धांश्च शिष्टांश्च संपूज्य प्रणिपत्य सपत्नी
कः शुचिर्भूत्वा परेणोपासनाग्निं दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणा
नायम्य देशकालौ स्मृत्वाऽग्नीनाधास्यमानस्तदंगत्वेन गणपतिपूजनं पुण्याहवा
चनं मातृकापूजनं नांदीश्राद्धं च करिष्ये। इति संकल्प्य कुर्यात्॥ अथ प्रधान सं
कल्पः॥ पूर्ववद्दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ
संकीर्त्य श्रीपरमेश्वरप्रीत्या सर्वकामार्थं होमपूर्वान्सोमपूर्वान् इष्टिपूर्वान्वा
।अग्नीनाधास्ये यानि शाक्ष्यामि येष्वाप्यधिकृत इति संकल्प्य॥ त्रिरूपांशु त्रि
रुच्चैरिति शिष्टाचारात्॥ बौधायनीयस्य दृष्टोक्तश्च यथोक्त सतो नस्त्रयुक्त पौर्ण
मास्यामाधानं केवलपौर्णमास्यां वा तत इष्टिपूर्वाधाने। अमावास्याधानं पूर्वेद्यु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

१०आ

से वा शुभदिने नक्षत्रे वाधानं तद्धोमपूर्वाधानं। उक्तकाले दीक्षितस्य सुत्या न विहन्यते
तथा सामयाचार्यैस्तत्सर्वमेवाधानं ऋतुनक्षत्रविरोधेनापि कर्तव्यं तत्सोमपूर्वाधानं।
उदवसानं वैकल्पिकं। उदवसायोपासने कूश्मांडहोमो न वा। कर्मा॰ एषु तेजुहुयादिति
श्रुतेः। पूर्णाहुत्यनंतरं वा। तदाहवनीयस्योत्तरतः। बोधायनीये स्पष्टकाठोक्तेश्च। सो पि
सर्वकर्मादिकालः। कर्मादि कूश्मांडहोमे ह विष्णो त्यावर्तिनमश्वं नभवंति। अथ ऋत्वि
ग्वरणं। अस्मिन्नग्न्याधेये अमुकगोत्रोत्पन्नममुकशाखाध्यायिनं यज[illegible]म। ७
म ध्वर्युं त्वां वृणे। अध्वर्यो हस्तं गृहीत्वा ब्रूयात्। ऋत्विग्भ्यस्ते फलहिरण्यादिदानमिति
शिष्टाचारः। एवं ब्रह्महोत्राग्नीध्रवरणं। सदस्यवरणं च। वृतानां मधुपर्कपूजनं नेति
केचित्। आधानस्यायज्ञत्वात्। अयमधुपर्कः॥ ॥ यजमानशाखया आर्त्वि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ज्यशास्वयावा। तत्रसर्वेषामृत्विजांकाठानुसमयेन । र्थानुसमयेनवा। आर्त्वि
ज्यशास्त्रयायदातदा ऋ कृष्णास्वीयहोत्रपक्षेहोतुः पृथगेव। तत्रयजमानः।
प्रत्यृत्विजंकूर्चंपाद्यमर्घ्यमाचमनीयंमधुपर्कइतिपंच द्रव्याणिपृथक्पृथक्
पात्रेषूपकल्पयतिमधुपर्केगत्रिवृतंपांक्तंवा। कांस्यपात्रेदध्यानीयमध्वा
नय। तिअंतेघृतमितित्रिवृत्। दधिमधुआपःसक्तवोघृतमितिपांक्तः। अं
पाम्यानीयवर्षीयसापिधायेतिप्रतिद्रव्यंपात्रद्वयं। ततोयजमानः ऋत्विजः
प्रतिअर्घ्यइतित्रिःप्राह। कुरुतेत्यृत्विजः। यज० दर्भासनंकूर्चइतित्रिः कूर्चं
कल्पयति। ऋत्विक्राष्ट्रभृदसि आचार्यासंदीमा त्वद्योषं। तस्मिन्नासीनोऽखंड
प्रविशति। यजमानः। पाद्यार्थमुदकंपाद्यामितित्रिः कल्पयति। तेनास्य द

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०

क्षिणपूर्वकं पादौ प्रक्षालयेत्। ऋ त्वि कृ। विराजो दोहोसि मयि दोहः पद्यायै
२ विराजः। प्रक्षाल्य तु हस्तावभिमृश्य। मयि तेज इंद्रियं वीर्यमायुः कीर्तिर्व
र्चो यशो बलं। आत्मानं प्रत्यभिमृशति। यजमानः। अर्घ्यमिति त्रिः। ऋ त्वि
कृ। आमागन् यशसा संसृज तेजसा वर्चसा पयसा च। तं मा कुरु प्रियं प्रजा
नामधिपतिं पशूनां। तस्यति गृह्णाति। यजमानः। शेषं निनयति। ऋ। त्वि
समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपि गच्छत। अछिद्रः प्रजया भूया
सं मा परासेचि मत्पयः। शेषं निनीयमानमनुमंत्रयते। अर्घ्येण साकं वस्त्राभ
रणादि दानं। यजमानः। आचमनीयमिति त्रिः। ऋ। त्वि कृ। अर्घ्यं जलं हस्ते गृ ३९
हीत्वार्धं उत्तराचमनीयार्थं स्थापयति। अमृतो [illegible] रणमसि। हस्तस्थं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आश्नाति। यजमानः। मधुपर्क इति त्रिः प्राह। ऋत्विक्। देवस्य त्वा० भ्यां प्रतिगृह्णामि। मधुपर्कं प्रतिगृह्य। पृथ्या स्त्वा नाभौ सादयामि इडायाः पदे। पृथिव्यां प्रतिष्ठाप्य। यन्मधुनो मधव्यं परमं नाद्यं रूपं तेनाहं मधुनो मधव्येन परमेण रूपेण परमो मधव्योन्नादो भूयासं। अंगुष्ठेनोपमध्यमया चांगुल्या त्रिः प्रदक्षिणमालोड्य सकृन्मंत्रेण द्विस्तूष्णीं। तेजसे त्वा श्रियै यशसे बलायान्नाद्याय। यः श्नामि। त्रिः प्राश्य सकृन्मंत्रेण द्विस्तूष्णीं सर्वं। अमृतापिधानमसि। स्वाहेति अप आचामति। ततः शुध्यर्थमाचमनं। यजमानः। गौरिति त्रिः प्राह। ऋत्विक्। गौर्धेनुर्भव्या माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्रणु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। पिबतूदकं तृणान्यत्तु।

चि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हे॰आ॰ ओंमुत्सृजत। उत्सर्गेसंस्थास्ति। यजमानस्तामुत्सृजति। अत्रैतावसेव मधुपर्क
४० पूजा कर्तव्या। भोजनांतेति केचित्। भोजनस्य वृजांगत्वात्। यजमानः अंनं
संस्कृत्य। भूतमिति त्रिः प्राह। ऋत्विक्। तत्सुभूतं विराडन्नं तन्माक्षायि तन्मेशी
यतन्मऊर्जं धास्तत्सुभूतमित्युक्त्वा। अथ ब्राह्मणान्भोजनेत्याह। य॰ ब्राह्मणा
न्भोजयति। तेषु भुक्तवत्सु अस्मै अन्नमाहारयति। ऋत्विक्। द्यौस्त्वे ददातु पृथि
वी प्रतिगृह्णातु पृथिवीं तेददातु प्राणः प्रतिगृह्णातु प्राणस्त्वाश्नातु प्राणः पि
बतु। तदन्नं प्रतिगृह्णाति। इंद्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः। वर्चोमे विश्वे
देवा वर्चो मे धत्तमश्विना। तस्माद्यावदर्पैतमंनंप्राश्नाति। ततः शुध्यर्थमाचमनं।
एवं सर्वेषां वरणक्रमेण मधुपर्कः॥ ॥अथ कर्कशाखीयो मधुपर्कः। यज॰।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

क्षि

पाद्यार्थमर्घ्यार्थमंत्रवत्त्रिराचमनार्थं शुक्षास्नानार्थमेवं एतत्पात्रचतुष्टयं मधुपर्क
युक्तकांस्यपात्रं पंचविंशतिदर्भैर्वा मावर्तविष्टरास्य मासनं। एतान्युपहार्यानुपक
ल्प्य। होतारममुकशर्माणं मधुपर्केणार्हयिष्ये। इति संकल्प्य। दिष्टरं हस्ते गृही
त्वा विष्टर इतित्रिरुक्त्वा। ऋत्विक्हस्ते दद्यात्। ऋत्विक्। अहं वर्ष्म सजातानां वि
द्युतामिव सूर्यः इदं तमधितिष्ठामि यो मा कश्चाभिदासति। उदगग्रे विष्टरे उपवि
शति। यज०। पाद्यमिति त्रिरुक्त्वा पाद्यार्थमुदकं दद्यात्। तेनोदकेन तस्य दौ पा
प्रक्षालयेत्। ऋत्विक्। लौकिकेन जलेनाचामति। यज०। गंधमाल्यफलादियुक्तं
अर्घ्यजलं अर्घ्यमिति त्रिरुक्त्वा दद्यात्। ऋत्विक् तत्प्रतिगृह्णाति। यजमानः॥
आचमनीयामति त्रिः। ऋत्विक्। तत्प्रतिगृह्य तदेकदेशं हस्तेन पिबति। अ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

कि

गृ० आ० मृतोपस्तरणमसि। ततो लोकाचमनं। आनीयमानं मधुपर्कमीक्षते। मित्र
४१ स्यत्वा चक्षुषा प्रतीक्षे। यज०। मधुपर्क दाता त्रिर्मधुपर्कं निवेदयेत्। कृतं
मधुपर्कं अंजलिना प्रतिगृह्णाति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पू
ष्णो हस्ताभ्यां प्रतिगृह्णामि। मधुवाता इति। तृचस्य राहूगणो गोतमो विश्वेदेवा गा
यत्री। मधुपर्कावेक्षणे विनियोगः। मधुवाता ऋतायते० ३ ष सो मधुमत्पार्थिवं रजः
मधुद्यौ० भवंतु नः। अवेक्ष्य। अंगुष्ठानामिकाभ्यां त्रिः प्रदक्षिणमालोड्य अंगु
लीगतं लेपं प्रतिदिशं निमार्ष्टि। वसवस्त्वा गायत्रेण छंदसा भक्षयंतु। पु
रस्तात्। रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंतु। दक्षिणतः। आदित्यास्त्वा जागते
नछंदसा भक्षयंतु। पश्चात्। विश्वेत्वा देवा आनुष्टुभेन छंदसा भक्षयंतु उत्तरतः॥ भूते

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

भ्यस्त्वा। त्रिर्मंत्रमुक्त्वा मध्यमानामिकाभ्यां त्रिरूर्ध्वमुत्क्षिपति किंचित्। ततः पात्रं भूमौ निधाय
मधुपर्कैकदेशं हस्तेन गृहीत्वा। विराजो दोहोसि। प्राश्य शुद्ध्यर्थमाचम्य॥ पुनः मधु
पर्कैकदेशं गृहीत्वा। विराजो दोहमशीय। प्राश्याचम्य। पुनर्गृहीत्वा। मयि दोहः पद्या
यै विराजः। प्राश्याचम्य। मधुपर्कशेषं ब्राह्मणाय प्रयच्छेन्न वा। स्थित्वाचमनी
योदकं हस्तेन गृहीत्वा। अमृतापिधानमसि। इत्याचामति। पुनर्लौकिकाचमनं।
पुनः स्थित्वा पिताचमनीयोदकं सव्येन गृहीत्वा। सत्यं यशः श्रीर्मयि श्रीः श्रयतां। प्राश्य लौ
किकं द्विराचमनं कुर्यात्। यज०। गौरिति त्रिर्गां निवेदयति। स हि ब्रूयात्। माता रुद्रा
णां इत्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप्। गोरुत्सर्जने विनियोगः। माता रु
द्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्रनु वोचं चिकितुषे
जनाय मा गामनागामदितिं वधिष्ट। ॐ मुत्सृजत इत्युक्त्वा। विसृजेत्। यजु०
वस्त्राभरणादिभिः संदद्यात्॥ इति मधुपर्कः॥ ॥प्रयोगान्तरं स्वबुद्ध्या॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ
४२ पश्चाद्दिशस्थमादाय पूर्वोपभूत्से अरणी कुर्वीतेन स तक्षणादिना संस्कृत्सा पु
त्रपस्त्रश्या यो अश्वत्थः शमीगर्भ आरूरोह त्वे सचा। तं ते हरामि ब्रह्मणा यज्ञियैः
केतुभिः सह। इत्यधरारणिमाहरति। पुनर्मंत्रमुच्चार्योत्तरारणिं। अश्वत्थाद्ध
व्यवाहा द्विजातामग्नेस्तनूं यज्ञियां संभरामि। शांतयोनिः शमीगर्भ
मग्नये प्रजनयितवे। औपासनसमीपे अधरारणिं संभरति। पुनर्मं
त्रमुच्चार्यैतत्रैवोत्तरारणिं। आयुर्मे धत्तामायुर्यजमाने।। युगपदुभे अभि
मंत्रयते।। एतदाचाराविरुद्धं पत्न्यपि करोति मानुषेणालंकारेणालंकृतौ
भवतः।। दंपत्योर्भोजनं हविष्यस्य सूत्रांतरात् भवति।। अधिवृक्षसूर्ये ।। ४२
गार्हपत्यायतनस्य पश्चात् स्थंडिलं तूष्णीमुद्धृत्योल्लिख्यावोक्ष्य। ध्वेयु
औपासनादेकदेशं पात्रांतरे उद्धृत्य गार्हपत्यस्य पश्चादुपक्लृप्ते स्थं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

४ य. केशश्मश्रूणि वापयते नखानि निकृंतते दंतान्धावते स्नात्वाहतं वासः परिधत्ते

उडेनिदधाति॥ सब्रह्मौदनिकोग्निः॥ सर्वैवौपासनं ब्रह्मौदनिकार्थमुद्धरतीत्य·प
स्तंबः॥ निशायामष्टमेमुहूर्त्ते तमग्निमुपसमिध्यपारिस्तीर्यदक्षिणतो ब्रह्मयज
मानयोःसदनेकृत्वोत्तरेणाअग्निंदर्भान्संस्तीर्यंतेषुपात्राणिसादयति॥ दर्वींपा
लाशींसमिधंसपलाशामाज्यस्थालीमग्निहोत्रहवणींचरुस्थालींमेक्षणंशूर्पंस
स्याजिनमुलूखलंमुसलंलोहितमानडुहंचर्मपाजकंवातिस्रश्चाश्वत्थीःसमिध
स्ति[illegible]भिःकवतीरस्तिसृभिःकावाप्रादेशमात्रीः॥ चत्वार्युद्धरणपात्राणिनिर्वपः श
रावमुपवेषंच॥ ब्रह्मयजमानावपरेणाग्निंदक्षिणातिक्रम्यस्वस्वसदने तृणंनिरस्या
पउपस्पृश्योपविश[illegible]तः॥ पत्नीपत्यालोके॥ अध्वर्युः॥ पवित्रेकृत्वा[illegible]नडुहेलोहितेच
र्मणिपाजकेवांतद्वीयशरावेणनिर्वपति॥ शरावंव्रीहिभिःपूरयित्वा॰ देवस्यत्वा॰

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

इ॰ श्रा॰ ४२

भ्यां ब्रह्मणे प्राणाय जुष्टं निर्वपामि। देवस्य॰ भ्यां ब्रह्मणे पानाय जुष्टं निर्वपामि
देवस्य॰ भ्यां ब्रह्मणे व्यानाय जुष्टं निर्वपामि। देवस्य॰ भ्यां ब्रह्मणे जुष्टं
निर्वपामि। अग्निहोत्रहवण्यां तूष्णीं प्रोक्षणीः सꣳस्कृत्य तूष्णीꣳ हविः
प्रोक्षति। उत्तानानि पात्राणि प्रोक्ष्य। कृष्णाजिनास्तरणा। दृषत्क्षी ५
२८ । तं सर्वं तूष्णीं करोति। न प्रक्षालयति। नावसिंचति पयसि श्रपयति।
अथवा चत्वार्युद पात्राणि स्थाल्यामानीय तस्मिन्नुदके श्रपयतीत्येके। द
र्वीꣳ समज्याज्यꣳ सꣳस्कृत्य श्रतं चरुमभिघार्योदगुद्वास्याग्नेः पश्चाद्द
र्भेषु सादयित्वाग्निꣳ सर्वतः प्रदक्षिणं परिषिच्यासादितां पालाशीꣳ स
मिधमाधाय चरुं दर्व्योपहत्य जुहोति। ब्रवेद्यसेकवयेमेध्याय वृचोवंदा
वृषभाय स्वाहा। यतो भागवतं भयं तन्नो अस्तु यदेवान्यजे देवांस्वाहा। य. न
२

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

४३

मा० ब्रह्मण इदं० अपि वाध्वर्युरभिमंत्रयेत्॥ तदा नस्त्वा हाकारः। न परिषेको प
रिषिच्य परिस्तरणानि विसृज्य। यज० सर्वं चरुं चतुर्षु पात्रेषूद्धृत्य प्रभृते म
सर्पिषोपसिच्य यस्थाल्यां शेषस्तस्मिन्सर्पिः शेषमानयति। चतुर्थोन्मुद्
तं चरुं चतुर्थ्य आर्षेयेभ्य ऋत्विग्भ्यो ददाति। होत्रध्वर्यु ब्रह्माग्नीध्रेभ्यः देषु गृही
त [illegible] म कवलेषु ऋत्विजः वरं ओदं दामि। इति वरं श्रावयेत्। ऋत्विजः प्राश्याच
[illegible] प्रतिगृह्णंति। अध्वर्युः। चित्रियाश्वत्थ समिध स्थालीगतशेषेभ्य ज्या
भिमंत्रयते। चित्रियादश्वत्थात्संभृता बृहत्यः शरीरमभिसंस्कृतास्थ॥ प्रजा
पतिना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै। समिधोभिमं
त्र्य ब्रह्मौदनिक आदधाति। समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिं॥ आस्मि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ० हव्या जुहोतनस्वाहा। अग्नय इदं० उपत्वाग्ने हविष्मतीर्घृताचीर्यंतु हर्यत। जुषस्वस
४४ मिधो मम स्वाहा। अग्नय इदं० तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि। बृहच्छोचा यवि
ष्ठ्य स्वाहा। अग्नय इदं० श्रुतिगायत्र्यभिर्ब्राह्मणस्य। यज्ञ०। मिथुना वा सिक्तरेतसा वध्वर्यो
ते [illegible] मि। धारयति ब्राह्मौदनिकं। श्व आधास्यमानोऽध्वर्यू रात्रिं व्रतं चरति।
न [illegible] वदति। न मांसमश्नाति। न स्त्रियमुपैति। इदं व्रतं आधास्यमानस्यापि। प्रजा अ
ग्ने संवासयाशाश्च पशुभिः सह। राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुः सदे। उत्त
रेण गार्हपत्यं कल्माषमजं बध्नाति। कृष्णबिंदुयुक्त इत्यर्थः। शिल्पैर्वीणादिभि
रितिहासपुराणैर्वा यजमानं जागरयंति। यजमानपत्न्या त्विजो जागृति। अशक्ता ४४
विषुयः कश्चन। यज्ञ० शल्कैरग्निमिंधान उभौ लोकौ सनेमहं। उभयोर्लोकयो र्

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ध्यातिमृत्युंतराम्यहं।यज्ञवृक्षशल्कैरग्निमिंधानोजागर्ति।अतिर्क्तमंत्रावृत्तिः।अ
ध्वर्युः।पूर्वोक्तान्संभारानाहृत्यासंभरेतत्तन्मंत्रेणप्रागपवर्गंसंभरति।वैश्वानरस्य
रूपं०माविशंतुनः।सिकताःसंभरति।यदिदंदिवोयददःपृथिव्याःसंजज्ञानेरो०यामिक्षाः।
र्जुबानू।ऊतीःकुर्वाणोयत्०शारदःसवीराः।आखूत्करं।ऊर्जंपृथिव्यारसमाभरंतः।शतंजी
वेमशरदःपुरूचीः।वम्री०भवामः।वल्मीकवपां।प्रजापतिसृष्टानां०रसमाभरामि।
सूदं।यस्यरूपंबि०मस्यांविधेम।वराहविहतं।यत्सर्पपश्यत्सरिरस्य०थनंहरामि।
पुष्करपर्णं।याभिरदृंहज्जगतः०शर्कराःसंतुसर्वाः।शर्कराः।अग्नेरेतश्चंद्रं०तरेयां।
हिरण्यशल्कैःसहरजतशकलानि।अश्वोरूपंकृत्वायदश्व०दःसवीराः।अश्व१५
ऊर्जःपृथिव्याअध्यु०मिषामदेम।अहुंनरं।गायत्रियाह्रियं०स्यावरुध्यै।देवागं।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

रुंधीयसाक्षात्।पर्णमयं।यपातेरुष्टस्याः शमीः शांसैहराम्यहं।शमीमयं।यत्रे
स्ययतः मनुष्यभः हि।वैकंकतं।यत्नेतां तस्य हृदः हृदयो भेगहा।अशनिहतं
हं त्वा समभरं जातवेदो मनुनेषि विद्वान्।एकपात्रे सर्वान्स्थकृतं भृतान्संभा
रान्स ह विहारदेशे निदधाति।ततउषःकालात्प्राकृतनकाले कृतस्नाना
भवंति।अध्वर्युः।अस्तोदनिक्रमाग्निं परिस्तीर्य दक्षिणतः सदने कृतोत्तरे
णाग्निं दर्भेषु पात्राणि सादयति। जुहूं स्रुवमग्निहोत्रहवणीमाज्यस्थालीं
महतीं पलाशशाखामग्निमुपयमनीः सिकताः सर्वौषधीः हिरण्यं रथं रथ
चक्रं वानवाश्वत्थीः प्रादेशमात्रीः समिधः द्वादश शमीमयीस्तिस्रश्चोदुं ४५
बरीस्तिस्रो वैकंकतीः [illegible] पुनर्क्ति।...लयम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मानो तीर्थेन मार्गेण विहारदेशात्कृत्वा दक्षिणतस्तउपविशतः। पत्नीपसालोके।
अध्वर्युः। तूष्णीं पवित्रे कृत्वा। प्रोक्षणीः संस्कृत्य उत्तानानि पात्राणि प्रोक्ष्य
स्रुक्स्रुवौ संमृज्याज्यं संस्कृत्य। आहवनीके ग्नौ हस्ताभ्यामरणी सह
स्पृशति। जातवेदो भुवनस्य रेत इह सिंच तपसो यज्जनिष्यन्योमयो भूः। अग्ने
तयोरथानो वर्धया रयिं। उपयम्यारणी धारयामाणो मंत्रो पठति॥ दोह्याचते ऽग्ने
वोर्वरी तते भागधेयं प्रयच्छामि ताभ्यां त्वादधे। अरणी यजमानाय सह प्रयच्छति। य
ज० मही विश्पत्नी सदने॰ ऋतस्य पुरोगा। अरणी प्रदीयमाने प्रतीक्षते। आरोह तदूर
तं शक्करी॰ यज्ञं यथा यजे। अरणी सह प्रतिगृह्णाति॥ ऋत्वियवती स्थो अग्निरेत॰
जनयिष्यथः। ते मत्स्यातः प्रजनिष्येथे। ते न सुवर्गे लोके॥ द्वाभ्यां प्रतिगृहीतेऽ णी

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०
४६

अभिमंत्रयते। अध्वर्युः॥ मयि गृह्णाम्यग्रे॰ सुवीराः॥ यो नो अग्निः पितरो॰ परागात्॥ हृ
न्यामात्मन्यग्निं गृह्णीते॥ यजमानोपि मंत्रौ जपति॥ यज॰ इदमहमनृतात्समुपैमि॰। से
मानुषमुपैमि। मानुषाद्दैव्यमुपैमि दैवीं वाचंयच्छामि। वाचंयच्छति। अध्वर्युः॥ अग्ने। रे
क्षांऽसि सेधति भुक्रशोचिरमर्त्यः॥ शुचिः पावक ईड्यः॥ अग्निमभिमंत्रयते॥ अनुगम
यति बालोदनिकमग्निं अग्निं तु कालेऽशुल्बोक्तप्रकारेणायतनानां करणं। प्राचीनं
वंशो हनिकाद्गार्हपत्यस्य॥ प्राचीनं गार्हपत्याद्द्वादशप्रक्रमेष्वाहवनीयस्य॥ आ
दक्षिणतो वितृतीयदेशे नेदीयसि गार्हपत्यस्य दक्षिणाग्नेः॥ आहवनीयात्प्राची
नमरत्निमात्रे सभ्यस्य॥ सभ्यात्प्राचीनमरत्निमात्रे आवसथ्यस्येति। अग्नित्रयपक्षे त्री स्व
ण्येवायतनानि॥ इतऊर्ध्वमुद्धननक्रमएव। सूत्रेऽनुक्रमपिक्रमप्रकरणाभ्यो विनिशु ४६

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

६

त्केवोद्धूतानामप्सां गपेतवीति पलाशशाखयायतनसंमार्जनं कर्म[illegible]मिति याज्ञिक
संप्रदायः। अपेतवीत वि॰ पितरो लोकमस्मै। पलाशशाखया गार्हपत्यायतनं सं
मार्ष्टि। एवं दक्षिणाग्नेराहवनीयस्य च॥ शाखाग्निरस्यापउपस्पृश्य। अभिमा द्वा
पउद्धन्यमानमस्या अमेध्य॰ गार्हपत्यायतनमुद्धत्यापउपस्पृश्य। एवं दक्षिणा
ग्नेः। एवमाहवनीयस्य। सभ्यावसथ्यकरणपक्षे तयोरपि॥ अयमेवाग्नेः सर्व
त्र क्रमः॥ शन्नो देवी॰ स्य र्यतुनः। शुद्धाभिरद्भिर्गार्हपत्यायतनमवोक्षति। एव
मितरयोः॥ अथवा अवदानप्रदानन्यायेनोद्धनावोक्षणे इति केचित्॥ तत्स्त्रा न
स्वारस्यं। आयतनानि परिस्तीर्य स्रवहोमां जुहोति। आयतने हिरण्यं निधा
य जुहोतीति वैखानसः॥ स्रुवेणाज्यं [illegible] ज्यं गृहीत्वा विग्राहं जुहोति गार्हपत्ये।
उद्धूपतमसस्प॰ रुत्तमं स्वाहा। सूर्यायेदं॰ उदुत्यं॰ सूर्याय स्वाहा। सूर्यायेदं॰ चि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

त

आ० चंदेवानां तस्तुषभ्य स्वाहा। सूर्यायेदं त्रिस्विर्गृहीत्वेव। मितरायेनेषु। नवा

४७ वरहोमाः। उपक्लृप्ताः संभरा एकैकं द्वैधं विभज्यार्धं द्वैधं कृत्वा। गार्हपत्य

दक्षिणाग्न्यायतनयोर्निवपति। अवशिष्टार्धं त्रेधा विभज्याहवनीयसभ्या

वसथ्येषु निवपति। तयोरभावेऽवशिष्टार्धमाहवनीय एव। अग्नेर्भस्मास्य

ग्नेः पुरीषमसि। सिकताभागं गार्हपत्यायतने निवपति। एवमितरयोः। सभ्या

वसथ्याभावे तयोराहवनीय एव संकल्पो मंत्राद्यस्या संभारनिवपने मि

तिबौधायनः। मंत्रावृत्तिर्न कर्तव्येति सुवचं। एकस्ये वा अग्नेस्तत्रस्थाप ४७

यताता। संस्थानमसि कामधरणं मयि तेकामधरणं भूयात्। गार्हपत्या

CC-0. Nagendra Vinod Collection. Digitized by eGangotri

यतने सिकता समोप्य अश्वत्थान्। प्रज्ञातान् तुषान् निवपति। यदद्ध्वर्यु
मसिकृतं तद्दिहास्य तुषान्निवपन्नदो मनसा ध्यायति। एवमितरयोः।
उद्धृत्याग्ने अधिधातुः पृथिव्या विशा आविशामहे ततः सप्त रश्मिभ्यः। आ शुं त्वा
यो दधिरे देवयं नो हव्यवाहं भुवनस्य गोपां। आस्व करं हि गोपत्ये त्वामे
तरयोः। यत्पृथिव्या अनाम तं संबभूव ते स चा। तदग्निरग्नये ददा
तस्मिन्नाधीयतामयं। गार्हपत्यायतने वल्मीकवपां निवपति। यदन्तरि
क्षस्यानाम तं संबभूव ते सचा। तद्वायुरग्नये ददातस्मिन्नाधीयताम
यं। दक्षिणाग्न्यायतने। यद्दिवो नाम तं संबभूव त्वे सचा। तदादित्योऽग्न
ये ददातस्मिन्नाधीयतामयं। आहवनीयायतने। तूष्णीमितरयोः। उ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

रि: आ० त्समुद्रा मधुमाꣳ ऊर्मिरागात्साम्नाज्यायप्रतरां दधानः। अग्नाचयेमयवा
४८ नोवयंचेषमूर्जं मधुमत्संभरेम। सूदंगार्हपत्ये। एवमितरयोः। इयस्ययअासीः
वशाहवि:तंगार्हपत्ये। एवमितरयोः। अद्दो देवाप्रथमानापृथव्यदेवैर्युक्ताव्य
सर्पोमहित्वा। अदःहृताःशर्कराभिस्त्रिविरुप्यजयालोकान्त्रदिशःश्वतस्त्रः।
शर्करागार्हपत्ये। एवमितरयोः। शर्कराभागंनिवपन्हूष्यवधंमनसाध्या। यत्ति
पाप्मनोवधोस्यात्। यास्तेअग्नि वास्तनुवोजातवेदोयाअंतरिक्षेउत ..र्थिवी
र्याः। ताभिःसंभूयसगणःसजोषाहिरण्ययोभिवंहहव्यमग्ने। उत्तरतःसभा
राणांहिरण्यमुपास्यति। पाप्मनेरजतंदूष्यायप्रददाति। हूष्याभावेभिरस्ये ४८
न। अपचेतुपस्पृश्य। चंदमग्निंचंद्ररथंहरिव्रतंवैश्वानरमप्सुषदंसुवीर।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

त्रिगार्हं तूर्णीं तविषीं। निराहृतं मूर्णि देवास इह सुश्रियं दधुः। उपास्त्तमभिमं
न्नयते। पुष्कर पर्ण उदुंबरशमी विकंकतोऽश्वत्थोशानिहतो पलाश्चेति सप्त
वानस्पत्याः। तानेकैकशः पूर्ववद्विभज्य सर्वेषां गार्हपत्य भागानादाय। इ
तः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। सगायत्र्या त्रिष्टुभा जग
त्या देवेभ्यो हव्यं वहतु प्रजानन्। तान्सह देवगार्हपत्यायतने निवपति। ए
वमितरयोः। पंच संभार पक्षे पुष्कर पर्ण विकंकतावहिताः पंचासंयाकृत्रिया
स्तनुवः संस्तनुवो मम। गार्हपत्यायतने स्त्रोषान् सिकताश्च संसृजति।
एवमितरयोः। संवः सृजामि हृदयानि प्राणो अस्तु वः। सर्वान्संभारान्
संसृजति। गार्हपत्यस्य। एवमितरयोः। ऋतं स्तृणामि पुरीषं पृथिव्या।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

अ॰

२ स्य

मतेध्यग्निमादधे सत्येध्याग्निमादधे। दिवस्त्वावीर्येण पृथिव्यै महिम्ना। अंतरि
क्षेपोषेण सर्वपशुमादधे। गार्हपत्यायतनस्थान्सर्वान्संभारान्संस्पृष्टान्क
ल्पयति। समीकरोति। एवमितरयोः। ततउर्ध्वंतुरश्मिषु ब्राह्मोदनिकस्यभ
स्मापोह्य। चित्तिस्रुक्। चित्तं॰ इमामध्वर्युः ब्राह्मोदनिकस्थाने भागत्रेऽअ
रणीसहस्र॰ दधाति। ततउत्तरारण्येर्मूलतः अष्टांगुलं छित्वारं शकलं
छित्वातस्यमूलं काष्ठं मंथस्याग्रभागबिले दृढं प्रोतं कृत्वा शकलं च अ
धरारणे र्मूलतो ष्टांगुलं दे शस्थ बिले समवधायतिर्यक्काष्ठेनोपरिपीडयि
त्वारज्ज्वा मथति। आउ॰ मुखोध्वर्युः। महान्वेग्निना जायस्व सहप्रजयासह ४८
रय्यासहपशुभिः॰ वर्चसेन। उपतिष्ठ॰ मंथा॰। मथ्यमानेग्नो
सहपुष्पा।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

चतुर्होतृन्यजमानं वाचयति। चित्तिः स्रुक्। सामाध्वर्युः। पृथिवी होता। पृ
ह स्पतिरुपवक्ता। अग्निर्होता। अश्वि० मित्र उपवक्ता। सूर्यं ते चक्षुः। वातं०
पृथिवीं शरीरैः। महाहविर्होता। सत्य हविरध्वर्युः। अच्युतपाजा अग्नीत्। सं
ह्राग्नेति सकृदेव मंत्रः। विश्वेष्वाप्यस्यत्वान्यायात्। यत्र भेदे मंत्रावृत्तिरिति केचित्।
अगन्नग्निर्होता पूर्वः। पूर्वेभ्यः पवमानः पावकः शुचिरीड्यः। जा
तमग्निमभिमंत्रयते। यजमानः। प्रजापतेस्त्वा प्राणेनाभिप्राणिमि। पूष्णः०
जीवात्वे पुण्याय। जातमग्निमभिप्राणिति। नासिकयाभ्यां संमुंचति। अहं
त्वदस्मि मदसि त्वं० लोककृज्जातवेदः। जातमभिमंत्रयते। अध्वर्यो वरं ते
ददामि। वरं ददाति। अध्वर्युर्वरं प्रतिगृह्णाति। यजमानः वाचं विसृजते। अ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ० ५० त्रक्षौमे वाससी परिदधाते यजमानः पत्नी च। आधानसमाप्तेः। ते वाससी अ
परवृत्तेग्न्याधेये अध्वर्यवे ददतः। अध्वर्युः। अग्नीज्जनन्नमृतं मर्त्यासो० मभि
सः रभंतां। जातमग्निं शरावादिसहितमंजलिना प्रतिगृह्णाति। भूर्भुवः।
आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामि। भू[illegible]र्भूम्ना द्यौर्वरिणां त०
मन्नाद्यायादधे। आयं गौः पृश्निरक्र० प्रयन्त्सुवः। धर्मः शिरस्तदयमग्निः।
संप्रियः पशुभिर्भुवत्। छर्दिस्तोकाय तनयाय यच्छ। प्राणे त्वामृतमादधामि।
अन्नादमन्नाद्याय। गोप्तारं गुप्त्यै। अग्ने गृहपते परिषद्य। दिवः पृथिव्याः
पर्यंतरिक्षाल्लोकं विंद यजमानाय पृथिव्यास्त्वा मूर्धन्त्सीदय यज्ञिये लोके यो ५०
नो अग्ने निष्ठ्यो यो निष्ट्यो भिदासतीदमहं तं त्वयाभिनिदधामि। तमग्निंगा
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

र्हपत्यायतने संभारेषु प्रतिष्ठापयति। वत्सादीनां मित्रयुवां तानां भृगूणां आ
दित्यानां त्वत्येव स्वसंत्रस्य स्थाने भृगूणां त्वा देवानां व्रतपते व्रतेनादधामी
ति मंत्रं ब्रूयात्। आयास्यगोतमइत्यादि द्वादश विष्णुवृद्धांतानामंगिरसां आंगि
रसां त्वा देवानां व्रतपते व्रतेनादधामि इति मंत्रं ब्रूयात्। एवयोमंत्रओ देवाना
मितिपदं केचित्प्रक्षिप्यते तत्सूत्रां तरीयं। भृग्वंगिरावर्ज्यानां सर्वेषां ब्राह्मण
नामादित्यानां त्वेति मंत्रं ब्रूयात्। नक्तं गार्हपत्यमादधाति। रात्रिशेषे। दिवा
हवनीयं। दिवसप्रारंभुत्तरं अर्धोदिते सूर्ये। पुरोदये आहवनीयमप्यादधाति
ब्रह्मवर्चसकामस्य यजमानस्य सूर्योदयोत्तरं गार्हपत्यादीन् सर्वानादधी
ति। यज० याभ्यां याभ्यां व्याहृतीभ्यां येन येन यच्चाध्याधानेन याभ्यांया

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰आ॰ भ्यां सार्पराज्ञीभ्यां येनयेन च घर्मेशिरसाध्वर्युराद्धाति सर्वत्वेतेन तेनोपति
५१ ष्ठते। भूर्भुवःसुवरिति व्याहृतयः। आदित्यानां त्वा भृगूणां त्वाङ्गिरसां त्वेति
य पर्य्याधानानि। घर्मः शिरः वातः प्राणः। अर्कश्चक्षुः। त्रीणि ध शिरांसि
भूमिर्भूम्ना। आयंगौः। त्रिंशद्धाम। अस्य प्राणात्। चतस्रः सार्पराज्ञः। य
ज॰ भूर्भुवः आदित्यानां त्वा॰ भूमिर्भूम्ना॰ आयं गौः॰ घर्मः शिरः॰ अपरेण
गार्हपत्यं तिष्ठन्नुपतिष्ठते। भृगूणामंगिरसां च। अध्वर्युर्वह्निपोषः। ७ अध्वर्युः।
गार्हपत्यं परिस्तीर्य ओषधीराज्येवधाय मिश्रयित्वे सर्वाः। गार्हपत्येति
तिस्रः समिध आ धाय नवा। या ते अग्ने पवमाना पशुषु या तनूः पृ
थिव्यां याग्नौ या रथंतरे या गायत्रे छंदसि। तं तेनावरुंधे तस्यै ते स्वाहा। ५१

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

या

अग्नेः पवमानायै प्रियायै तन्वा इदं। याते अग्ने पावका शुप्रि तनूर्यान्तरिक्षे
या वायौ या वामदेव्ये या त्रैष्टुभे छंदसीदं तेनामवरुंधे तस्यै ते स्वाहा। अग्नेः पाव
कायै प्रियायै तन्वा इदं। याते अग्ने शुचिः प्रिया तनूर्या दिवि या दिसे या बृहति सूर्ये २
या स्तनयित्नु या जागते छंदसीदं तेनामवरुंधे तस्यै स्वाहा। अग्नेः शुच्यै प्रि
यायै तन्वा इदं। तिस्रः पवमानाहुतीराज्यमिश्रौषधीभिर्जुहोति। अग्निराम
नार्थं हस्तेनैव होमः बौधायनीये सर्वौषधिमंजलिना जुहोति इत्युक्तत्वा
त्। जुह्वा होमस्त्वाहवनीय एव नान्यत्र वचनात्। यजमानः। सुगार्हपत्यो वि
दहन्नरातीरुषसः श्रेयसीः श्रेयसीर्दधत्। अग्ने सपत्नांऽअप बाधमा
नो रायस्पोषमिषमूर्जमस्मासु धेहि। आहितं गार्हपत्यमुपतिष्ठते। अध्वर्युः।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०
५२

गार्हपत्येग्निमरणयनान्यादीपयति। उपप। नार्थं सिकताः। महे उरावा दि
वान्ते उपकल्पयति। अग्न्युद्धरणार्थं महसावं नयथ। बहिरंगारपातो न भवति।
तथा। हिरण्यं वस्त्रं च। परिकर्मिणः अग्ने पुरस्ताद्धारयंति। यज०। अ०। त्राहवनीय
पक्षे गार्हपत्यस्य पश्चादुपविश्य आयुष्कामो अजस्रमाधास्य इति संकल्पं
करोति। गत। श्रियस्तु न संकल्पः। अध्व० उ० जसेवकायतो यच्छेदृषभो शुष्मा
यायुषेव। ऊ। तपतनूरसि रत्नतूर्यस्ते देवेषु महिमा सुवर्गः। यस्त
आत्मा पशु नर्यः। पुष्टिर्याते मनुष्येषु पप्रथे। तया नो अग्ने जुषमाण एहि।
दिवः पृथिव्याः पर्यंतरिक्षाद्। तासभ्युभ्यो अप्योषधीभ्यः। यत्र यत्र जातवेदः
संबभूथ ततो नो अग्ने जुषमाण एहि। उद्वा त्रिष्वे देवा अग्ने भरंतु चित्तिभिः। ५२

CC-0 Mrugendra Vinod Collection. Digitized by eGangotri

स नो भव शिवतमः सुप्रतीको ऽग्ने विभावसुः। वामदेव्ये गीयमाने च तस्तम्भि गार्हप-
त्यादाहवनीयमुद्धरति। प्रणयनीयमिध्ममुद्यच्छति। आग्नीध्रः उपयतेनाग्ना
अध्वर्युणा धार्यमाणे ऽश्मो त्रिपागारादितः शुष्कं लौकिकमग्निमाहृत्य लौकि-
कारण्यामथित्वा वा सूत्रान्तरीये कयोनि स्वपक्षे गार्हपत्याद्दक्षिणाग्निं सा-
द्ध्याति। भुवः। आदित्यानां त्वा देवानां व्रताद्धामि॰ आयं गौः॰ यन्तु वः। त्रिंशद्धा-
म विराजति॰ वहद्युभिः। वातः प्राणस्तदयमग्निः सं प्रियः पशुभिर्भुवत्। स्वदि-
तं तोकाय तनयाय पितुं पच। अग्नेऽन्नपा मयोभुवः सुशेव द्यौः पृथिव्याः पर्य-
[क्षाल्लोकं विंद यजमानाय पृथिव्यास्त्वा मूर्धन्सादयज्ञिये लोके यो नो अग्ने नि-
ष्ट्यो यो निष्ट्यो भिदासतीदमहं तं त्वया भिनिदधामि। पूर्वोक्तेषन्यतरमग्निंश-
८ अधस्तादुपया [illegible] र घ्नने: गो: अध्वर्युमुपगच्छति ८
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

०आ०
५३

पय

रावादौगृहीतं प्राङ्मुख एव दक्षिणाग्न्यायतने संभारेषुप्रतिष्ठापयति। यजमा०
श्रा स्यमानं दक्षिणाग्निं द्वितीयया व्याहृत्या यथर्ष्याधानेन द्वितीयत्रतीया
भ्यां सार्पराज्ञीभ्यां द्वितीयेन च घर्मशिरसोपतिष्ठते। भुवः। आदित्यानां० आयंगौः०
त्रिंशद्धाम। वात: प्राणः एतैर्मंत्रै रूपस्थानं। अध्वर्युरन्यहस्ते ग्निं दत्वा दक्षिणा
ग्निं परिस्तीर्य पूर्ववदाज्यौषधीभिः पवमानाहुतीभिर्जुहोति। अध्वर्युः। यावाजिन्न
ग्नेपवमाना पशुषुप्रियातनूस्तामावह। यावाजिन्नग्नेः पावकाप्सुप्रियातनूस्तामा
वह। यावातिन्नग्नेः सूर्येशुचिः प्रियातनूस्तामावह। अश्वस्य दक्षिणे कर्णे त्रिरग्ना
ग्नितनूर्यजमानं वाचयति। विक्रमस्व महां असि वेदिषन्मानुषेभ्यः। त्रिषु
लोकेषु जागृहि। नजयाचथनेन च प्राचीमनुप्रदिशं प्रेहि विद्वान्थ्याहिद्वियदे ५३

दिवः१ ६ं सुवर्गत्वा
चतुष्पदे। क्रमध्वमग्निनानाकमुख्यं हस्तेषु बिभ्रतः॥ दिवः१ ६ं सुवर्गत्वा
मिश्रा देवेभि राध्वं। तिसृभिरध्वग्रथमाः प्राचो गच्छंति। सर्वेषां मंत्रः। ब्रह्म॰
जमानौ दक्षिणतो गच्छतः। उत्तरत इतरे। अध्वर्युरग्निं जानुदघ्ने धृत्वा प्रथमं
शः तृतीयभागं हरति। ततो नाभिदघ्ने द्वितीयं। तत आस्यदघ्ने तृतीयं। अग्निमादे
स्यं च नत्यवेति। पूर्वमग्निं हरति पश्चादन्वेति। तस्य दक्षिणतो वा परिगच्छैव हर
ति। य॰ इमा उ मामुपतिष्ठंतु॰ दिदीहि जातवेदः। मध्यदेशे हि यमौमग्निमभिमंत्र्य ण
यतो अध्व॰ अर्धमार्गे भूमौ हिरण्यं निधाय तिष्ठति। य जं॰ अध्वर्यो वरं ते ददामि। वरं
ददानि। अध्व॰ वरेदत्तेनाक्रो मित्र ध्रः प्रतिष्ठासंक्रमणं। हिरण्यमतिक्रम्याये गच्छ
ति। ब्रह्मा। बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः। प्रभंजन्सेनाः

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

८३

हि० आ०
५८

मम्रणोयुधाजयन्नस्माकमेमध्यवितारथानांविहारस्यदक्षिणतोरथंरथचक्रं
वात्रिःपरिवर्तयति। अध्व० यावच्चक्रंत्रिःप्रवर्ततेतावत्कालमध्ये॥ अभ्यस्थ्ठा
द्विश्वाःपृतनाअरातीस्तदग्निराहतदुसोमआह। बृहस्पतिःसवितातन्मआ
हपूषामाधात्सुकृतस्यलोके॥ प्राङ्मुखमश्वंदक्षिणेनाग्रपादेनसंभारानाक्रम
यति॥ पार्श्वतोवासंभाराणांउत्तरदिक्स्थंभागंआक्रमयति॥ यथाहितस्या
ग्नेरंगाराअभ्यावृत्यपदेआसमिध्यंतितथा॥ यदक्रंदःप्रथमंजायमान
उद्यन्त्समुद्रादुतवापुरीषात्॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंम
हिजातंतेअर्वन्॥ अश्वंआहवनीयस्यपुरस्तान्नीत्वाप्रदक्षिणंपर्याणी
यप्रत्यङ्मुखंदक्षिणेनाग्रपादेनतत्वेवपदंपुनराक्रमयति॥ अश्वाभावे ५८
ने

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

अनडुत्पदे आदधीत ॥ अनडुांस्तमुवैवानेय: ॥ नजरठ: ॥ तस्मिंनाहवनीयायतनए
वांत: पादेपरिकर्मिभिर्ध्रियमाणेस्मृति ॥ अच्च॰ यदिदंदिवोयदिद: पृथिव्या: रंभि
दानेरोदसीसंबभूवतु: ॥ तयो: पृष्ठेसीदतुजातवेदा: शंभू: प्रजाभ्य: स्तनुवेस्यो
न: ॥ हस्तस्थमेवाग्निमभिमंत्र्य ॥ भूर्भुव: सुव: ॥ आदित्यानांत्वादे॰ भूमिर्भूम्ना
द्यौ॰ अस्यप्राणादपानंत्यतश्चरतिरोचना ॥ व्यख्यन्महिष: सुव: ॥ अर्कश्चसु
स्तरसौसूर्यस्तद्दयमग्नि: संप्रिय: पशुभिर्भुवत् ॥ यत्तेशुक्रशुक्रंवर्च: शुक्राति
नू: शुक्रंज्योतिरजस्रं तेनमेदीदिहितेनत्वादधेग्निनाग्नेब्रह्मणा ॥ प्राणंत्वा
मृतआदधाम्यन्नाद्यमंनाद्यायगोप्तारंगुप्त्यै ॥ अग्नेसंम्राडजैकपादाह
वनीयदिव: पृथिव्या: पर्यंतरिक्षाल्लोकंविंदयजमानायपृथिव्यास्त्वामूर्ध्न

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰ आ॰ सीदयज्ञिये लोके यो नो अग्ने निष्ठो भिदासतीदमहं तं त्वयाभिनिदधामि। य
५५ ज्ञायज्ञियेसाम्नि हूहतिश्यै ते व गीयमाने आहवनीयायतने संभारेषु अग्निं
प्रतिष्ठापयति। अग्नौ निहिते वारवंतीयं गायति। यज॰ भूर्भुवः सुवः। म्ना द्वित्याना॰
भूमिर्भूम्ना॰ अस्य प्राणादपान॰ अर्कश्चक्षुः॰ नाग्ने ब्रह्मणा। सर्वाभिर्व्याहृति
भिर्यथर्थ्याधाने न प्रथमो त्तमाभ्यां सर्पराज्ञीभ्यामुत्तमेन घर्मं शिरसोपतिष्ठते।
आहवनीयमाधीयमानमध्वर्युः आनशे व्यानशे सर्वमायुर्व्यानशे। आहितमा
हवनीयमुपतिष्ठते। आहवनीयं परिस्तीर्य पूर्ववदाज्येनौषधीभिश्चाग्निशाज
नार्थं पवमानां ॐ ... हुत्वा जुहोति हस्तेन वा। याते अग्ने पवमाना पशुषु॰ या ते ५५
अग्ने पावका अप्सु प्रिया पातु॰ या ते अग्ने सूर्ये शुचिः प्रिया॰ अश्व आनशाइत्युपस्था

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

नं।यज० आनशोव्या नशो सर्वमा पुर्व्यानशे। येते अग्ने शिवेतनुवा।विराट्च स्वरा
ट्च।ते मा विशतांते मा जिन्वतां। येते अग्ने शिवे तनुवो सम्राट्चाभिभूश्च।तेमा
विशतांते मा जिन्वतां। येते अग्ने शिवे तनुवो। विभूश्च परिभूश्च ते मा० येते अ
ग्ने शिवे तनुवो प्रभ्वी च प्रभूतिश्च ते मा विशतां० यास्ते अग्ने शिवास्तनवः ता
भिस्त्वा दधे। आ ग्नेः शिवाभिश्च तनूभि राहवनीयमुप तिष्ठते। आ हितं अध्व
र्युः सभ्यावसथ्य योः। लौकिकमग्नि माहृत्य मथित्वाहवनीयाद्वा तूष्णीं यथ
र्थ्याधाने नैवाधानं कुर्यात्। शमन होमास्तु मंत्रेण। यजमानोपस्थानेऽध्वर्यु
वत्। एकेषां मते ऽग्न्याधेये प्रतिषिद्धानि प्रतिषिद्धो सभ्यावसथ्यो। अध्वर्युः। सामानि
अग्न आयूंषि० आरे बाध स्व दुच्छुनां स्वाहा। अग्नये पवमानायेदं० अग्ने

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ः आ०
५८

पवस्वस्वपा० दधत्पोषं२ रयिं मयिस्वाहा। अग्नये पवमानायेदं० अग्ने पावक रो
चिषा० यक्षि च स्वाहा। अग्नये पवमानायेदं० अग्निर्ऋषिः पवमानः पांचजन्यः
पुरोहितः। तमीमहे महागयं२ स्वाहा। इयं तृतीयामेके समामनंति। तदा दध
द्रयिं मयि पोषमिति द्वितीयमंत्रपाठः। तिसृभिर्गार्हपत्ये तिस्र अश्वत्थीः समिध
आदधाति। एवमितरयोः सभ्यावसथ्ययोश्च। ततः शमीमयीर्घृतान्वक्ता वक्ष्य
माणमंत्रैस्तिस्रस्तिस्रः। समुद्रादूर्मिर्मधुमां२ उदार० तस्य नाभिः स्वाहा। अग्न
य इदं० वयं नाम प्रब्रवामा० घोर एतत्स्वाहा। अग्नय इदं० चत्वारि शृंगा त्रयो अ०
मर्त्यां२ आविवेश स्वाहा। अग्नय इदं० तिसृभिर्गार्हपत्ये तिस्र आदधाति। ए
वमितरयोः॥ प्रेद्धो अग्ने दीदिहि पुरो नोजस्रया सूर्म्या यविष्ठ। त्वां२ शश्वंत उ ५९

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

षपं तियाज्ञः स्वाहा। अग्नय इदं। औदुंबरीः समिधं गार्हपत्य आदधाति। ए
वमितरेषु। विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे॥ यस्माद्योनेरुदा
रिथा यजे तं प्रत्वे हवींषि जुहुरे समिद्धे स्वाहा॥ अग्नय इदं॰ वैकंकतीं गार्हपत्ये एव
मितरेषु। तां᳘ सवितुर्वरेण्यस्य चि॰ धारां पय सामहीं गां᳘ स्वाहा॥ सवितृ इदं॰ श
मीमयीं᳘ समिधं गार्हपत्ये। एवमितरेषु। ततः प्रातरग्निहोत्रस्य ऽता तूष्णीम्मंत
रग्निहोत्रं जुहोति॥ सर्वं तूष्णीमिति प्रयोगवैजयंत्यां॥ प्रधानमात्रमेव तूष्णीमिति
सूत्रांतरात्परिगृहीतं शिष्टैः। तदेव समुवचनं॥ यज॰ पुरस्तात्सूर्पा ऊतैः। स्त्रिक्क
न्नी हितिश्च स्त्रिहितिश्च। सुदाम्नी चाम निश्चा नाऊ तिश्च तिर्ऋतिः॥ एतास्ते अग्ने

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ० हि०
५२

घोरोस्तनुवः॥ अमर्त्यो मर्त्यस्त्वा नुगच्छंतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ घोराभिस्तनूभि
राहवनीयमुपतिष्ठते॥ अध्वर्युः॥ जुहूं स्रुवं च संमृज्याहवनीयं परिस्तीर्य चतु
र्गृहीतेनाष्टगृहीतेन द्वादशगृहीतेन वा स्रुचं पूरयित्वाग्रेणाहवनीयं गत्वा
हवनीये समिधमाधाय॥ सप्त ते अग्ने समिधः सप्त जिह्वाः स० घृतेन स्वाहा॥ तिष्ठ
न्नाहवनीये पूर्णा [illegible] ऊ तिजुहोति॥ अग्नये सप्तवत इदं०
यज० अध्वर्यो वरं ते ददामि॥ श्रावयित्वा वरं ददामि॥ इयं पूर्णाहुतिस्तस्य
काग्निहोत्रस्थाने वा भवति॥ तद्दानलक्ष्मीमग्निहोत्रं जुहोति॥ अध्वर्युः०।
पुनश्चतुर्गृहीतेनाष्टगृहीतेन द्वादशगृहीतेन वा स्रुचं पूरयित्वा॥ ये अ
ग्नयो दिवो ये पृथिव्याः समागच्छंतीषमूर्जं दुहानाः॥ ते अस्मा अग्नयो द्रवि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पं हुत्वेष्वा ॥ मीता आज्ञुतिः भाजोभूत्वा यथालोकं पुनरस्त्वं परेतस्वाहा ॥
पूर्ववद्दक्षिणतस्तिष्ठन् द्वितीयां पूर्णाहुतिं जुहोति ॥ अग्निभ्य इदं ॥ अत्र
सूक्तमपिस्वशाखावोक्तमंत्र स्यागभीत्यास्वशाखवोक्तमंत्रैरध्वर्यु
णा विराजक्रमोपास्थानं कर्तव्यमिति केचन मन्यंते ॥ तत्सूक्ताह जं ॥ यज्ञ०
येतेअग्नेशिवेतनुवौ विरा० येते० संभ्रा० येतेविभू० येते० प्रभ्वी० या
स्ते अग्ने शिवास्त० दधे । उपरिष्टात्पूर्णाहुतेः शिवाभिराहवनीयमुप
स्थाय विराजक्रमैर्दक्षिणाग्न्यादीनग्नीनुपतिष्ठंते ॥ अथर्वांपितुं मे
गोपाया अन्नं प्राणेनसंमितं ॥ त्वयागुप्ता इषमूर्जं मदंतः शतं जीव म

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

शारदः सवीराः। दक्षिणाग्निमुपतिष्ठते। नर्यप्रजां मे गोपाय मूलं लोकस्य सं
ततिं आत्मनो हृदयान्निर्मितां तां ते परिददाम्यहं। गार्हपत्यं। शाꣳस्य भूर्मे गो
पाय विश्वरूपं धनं वसु। गृहाणां पुष्टिमानं दं तांꣳस्ते परिददाम्यहं। आहवनी
यं। सप्रथ सभां मे गोपायेन्द्रियं भूतिवर्धनं। विश्वजनस्य छायां तां ते परिददा
म्यहं। सभ्यं। अहे बुध्निय मंत्रं मे गोपाय श्रियं च यशसा सह। अहये बुध्नियाय मंत्रꣳ
श्रियै यशः परिददाम्यहं। आवसथं। सभ्यावसथ्ययोरकरणपक्षे मंत्रयोर्लोपः। आ
हवनीये संकल्पपक्षे मंत्राभ्यामाहवनीयस्योपस्थानं एवं च धाग्नीन्व्यक्त्वा। मत्
विराट् स्रष्टा प्रजापतेः। ऊर्ध्वारोहद्रोहिणी॥ योनिरग्नेः प्रतिष्ठितिः। सकृन्मंत्रे ५७
णयुगपत्सर्वानग्नीनुपतिष्ठते॥ —— ॥ इति हिरण्यकेशीयं पूर्णाहुत्यंतमन्वा।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

धर्मा॥ ॥अथपवमानेष्टयः॥ताःषट् पंचचतस्रस्तिस्रोद्वे एका वा।आग्नेया
श्चतस्रो नानातंत्राः।अनुनिर्वाप्यानां आदित्यव्यतिरिक्ता एका।आदि
त्यस्यैके तिषट्।पंचपक्षेअनुनिर्वाप्यानां पंचानामेकैव।चतुःपक्षे।आ
ग्नेयी एका।पवमानस्य द्वितीया।उत्तरयोस्तृतीया।अनुनिर्वाप्यानांच
तुर्थ्यः।त्र्यपक्षे।आग्नेयी॥ पावमानी॥अनुनिर्वाप्या द्व्यपक्षे।आग्नेयेन
समानतंत्रा पावमानीअनुनिर्वाप्याच।एकपक्षे सत्रांतरिक्ताष विक्का
तस्याक्रियमाणायांअनुनिर्वाप्यदेवतालोपोभवतीतिनांगीकारः।इ
ष्टिद्वयपक्षंसद्यःकरणपक्षंत्वाश्रित्यप्रयोगः।गार्हपत्यस्य पश्चाद्दर्भेष्वा
सीनोदर्भान्धारयमाणोयजमानःपत्न्यासहप्राणानायम्यदेशकालौ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मग्निं पावक

ह०आ० ५९ संकल्प्यअग्निंपवमानंमग्निंशुचिमाग्नेयेनसमानतंत्रंकुर्वन्तिध्यायस्ये।
इतिसंकल्प्य।अध्वर्युःत्रेधाग्निषुअन्वाधानादि ममाग्नेअद्य यज्ञायऽइमा
मूर्जेयथातिथि।एषुः हविः।आमावास्यंतत्रंवत्सैःसव्रतोपायनं।वेदंकृत्वावे
दिः।इध्माबर्हिः।परिस्तरणंमोभाग्नाग्नी०कर्मणेवां०पात्रप्रयोगकाले केशा
निंशत्कपालानिनिर्वपणकाले।अग्नयेजुष्टंनिर्वपामि।अग्नये५वमा
नाय०अग्नयेपावकाय०अग्नयेशुचये०अग्नेहव्यंरक्षस्व।अग्नेपवमा
नेह०अग्नेपावकह०अग्नेशुचेहव्यं०प्रोक्षणासंस्कारांतंकृत्वा।अधि
देवनोस्यननादिप्रेषांतकर्मसभ्यावसथ्ययोः।करणपक्षेसर्वेषांराजन्य ५८
स्यैवेत्यापस्तंबः।तयोरकरणपक्षेनास्तीतिकृत्वानलिख्यते।अध्व०क

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ल्पे तांद्यावापृथिवी कल्पं तामापऽॐषधीः। कल्पं तामग्नयः पृथग्मम ज्यैष्ठ्या
यसव्रताः ये ... यः समनसोंतरा द्यावापृथिवी वा संतिकाहृतृ अभिकल्पमा
नाइंद्रमिवदेवा अभिसंविशंतु। गार्हपत्यस्य पश्चात्तिष्ठन्यथर्तु ऋत्विः सामन
सोमांयुगपदेवसर्वानग्नीनुपतिष्ठते यथर्तु हः ग्रीष्मादृतु इत्यादि प्रोक्षणे।
देवस्यत्वा० भ्यामग्नयेग्नये पवमानायाग्नये पावकायाग्नये शुचये वा जुष्टं
प्रोक्षामि। कपालोपधाने सर्वे ऽष्टाकपाला आग्नेयविकाराः। पिंडं कृत्वा।। य
थाभागं व्यावर्तध्वं० २ यथाभागं व्यावर्त्तेथां। इदमग्नये पावकाय० इदमग्न
ये शुचये। अंत्ययोरादेशानं। सर्वेषां मंत्रेणाभिघारणं। तेजसाग्नये जुष्टम
भिघारयामि। साग्नये पवमानाय० जसाग्नये पावकाय० साग्नये शुचये जु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हृ०आ०

६०

ष्टम० प्रिये० आसीर्दंतु। यज० यज्ञास्थः सर्वतःश्रिताः सर्वतोमांभू
तंभाविष्यच्छ्रयंतां८ २।० अयंयज्ञः। पंचहोता० अयंवेदइत्यादि० आज्य
भागांते। अग्नयेनुब्रूहि। अवदायात्याकम्याश्राव्यप्रत्याश्राविते०
अग्निंयज। अग्नेरहं० अन्नादः० अग्नयेपवमानायानुब्रूहि। अ
ग्निंपवमानंयज। अग्नेःपवमानस्याहं० अन्नादः अग्नयेपाव
कायानुब्रूहि। अग्निंपावकंयज। अग्नेःपावकस्याहं० अन्नादः
अग्नयेशु चयेनुब्रूहि। अग्निंशुचिंयज अग्नेःशुचेरहं। अ
न्नादः सर्वेषांविरजा ... सिवंचतुर्धाकरणंच। दक्षिणा ६०

CC-0. Mrigendra Vinod Collection. Digitized by eGangotri

म
पतिं धेहि । त्वामिंद्रोवृणीत वृत्रतूर्ये त्वमिंद्रं वृणीथा वृत्रतूर्ये प्रोक्षितमसि । आ
ज्यमभिमंत्रयते । ब्रह्मन्नप आज्यं प्रणेष्यामि यजमानवाचंयछ । कोवः प्रणय
तिसवः । देवा गातुविदो गातुं यज्ञाय विं० ज्यतां । आज्यं प्रणयति । भूम्ने त्व विकृ
तं । ब्रह्मपूतमसि कस्त्वा पुनक्ति सहा पुनक्तु । निर्वपणकाले । अग्नीषोमाभ्यां
जुष्टं निर्वपामि । अग्नाविष्णुभ्यां जुष्टं निर्वपामि । इंद्राग्निभ्यां जुं० अदित्यै जुं०
विश्वदेशिपिविष्टाय जुष्टं० अग्नीषोमौ हव्यं रक्षेथां । अग्नाविष्णू हव्यं र
क्षेथां । इंद्राग्नी हव्यं रक्षेथां । अदिते हव्यं रक्षस्व । विष्णो शि पि विष्ट हव्यं
रक्षस्व । ॐ शाखस्थां ते च पुरोडाशीयविभागः । यथा भागं व्यावर्तध्वं । २ यथाभा
गं व्यावर्तेथां । इदमग्नीषोमाभ्यां चाग्नाविष्णुभ्यां चेंद्राग्निभ्यां च । पुरोडाशीया

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ० म ॥

न्। इदं[illegible]सं च विछ्वे शिपि विह्मयच। सर्वथा न। ततः पुरो आशीपानूपिन,
६२ ष्टि। के पालोपधाने चीने कादरा के पालानुपधाय। अपाग्ने ग्न आदेवयजं व
हा भुवः सिद्ध पि० स्थाली [illegible] मुपदधाति। तथैवाहिंयांसु। सिं। भूगुणामंगि० ती
प्येध्वं। भृगूणामंगिरः प्यस्व। उपिष्ठानि समोप्य भूर्पीटे वतं तुलान्या च्चांतरे
त्स्कीः संवपति। हर्योस्त्वे ति पिष्टा स्युत्सूय देवोवः सविते तं डलानुसुना। न। स
मा प इति पिष्टेध्यानी यमणी ता दाज्यं स्थाल्यो स्त्रूभी मानयति। पिष्टे धुत
ता आनीय स्थाल्यो स्त्रूभी मानयति। पिष्टं कृत्वा पुरोडाशा न्विभजति। यथा
भागं व्यावर्तध्वं। यथाभागं व्यावर्तेथां। इदमग्नाविष्णुभ्यां इदमिंद्राग्नि ६२
भ्यां। रोपु[illegible]जौन। धिष्ठि स चरव्यान्विभजति। यथाभागं व्यावर्तेथां। इदं महि
श्रा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

कालेअग्न्याधेयीकीर्दक्षिणाद्ददाति॥अजंपूर्णपात्रमुपबर्हणंचाग्नीधेद
दाति।अश्वं॥ऋणे।धेनुंहोत्रेगार्हपत्यदेशे।अनड्वाहमध्वर्यवे॥आहवनी
यदेशे।रथंगाःषट्द्वादशाचतुर्विंशतिरपरिमितावा॥एताअग्न्याधेययिकी
र्दक्षिणाःआग्नेयदक्षिणाकालेददाति॥आग्नेयस्यापिताएवदक्षिणाः॥आ
ग्नेयोवाअष्टाकपालोग्न्याधेयमितिश्रुतेः॥त्रिंशन्मानेहिरण्येपूर्वयोःपवमा
नहविषोः।चत्वारिंशन्मानमुत्तरस्य।रथंगावःमिथुनौगावौवासस्त्रिंशन्माने
हिरण्येचत्वारिंशन्मानंचहिरण्यंएताःसाधारणाःसर्वेभ्योददाति।उ॰ऊजि
तयाकृतानुमंत्रणवत्॥नपार्वणः॥शेषंप्रकृतिवत्॥ इष्टिःसंतिष्ठते॥
तदानीमेवअनुनिर्वाप्ययाइष्ट्यायक्ष्ये॥अध्वर्युः॥तेषुवाग्निषु।ममाग्ने॰
अस्ययज्ञाय॰इमामर्जयथातिथिः।पंष्टंहविः॥पौर्णमासंतंत्रं।बर्हिषात्र

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰आ॰ नं। संसदश सामिधेन्यः। ततस्त्वांत्र यो विंशतिधा। परिभोजनीषेदमुपंवर्ष
६२ परिस्तरणं। नो भाव ग्नाः॰ कर्मणो वां॰ पात्र प्रयोगकाले त्रयस्त्रिंशत्कपालानि
इचरुस्थाल्यो द्वितीया स्रुक्सा। मेक्षणे चमसो शेषं प्रोतिवत्। प्रणयनकाले क
अप आज्यं च प्रणयति। इक्षा पत्वा। अपश्च मसमादाय प्रक्षालयति। पुन
र्मंत्रेणाज्य चमसमादाय प्रक्षालयति चमसे अप आनीय द्वितीये ऽहना
ज्यमानयति। कस्त्वा गृह्णाति स त्वा गृह्णातु कस्मै त्वा गृह्णामि तस्मै त्वा
गृह्णामि पोषाय त्वा। चमसे आज्यमानयति। अनया वो गृह्णामीत्युक्त्वा।
अनयाच्वो। ॰ ॰ामि इत्याज्यस्य। अपउत्पूयदे वस्त्वा सवितोत्पुनातित्वि ६२
घृतमुत्पुन॰ ति। अपामिमं आज्यदेवाग्रहणे ग्रहे ॰ ॰ नयाग्रेयज्ञ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ

स्येइदं विष्णुर्वेशिपिविष्टाय। घर्मोस्थ विश्वायुषः। क्रमेण स्थाल्योस्तंडुलानां
वपति। प्रथनपरिमार्जनेपुरोडाशानामेव॥ अंतरितं२० सर्वेषां॥ देवस्त्वा०
पुरोडाशानां। अग्निस्ते सर्वेषां। संब्रह्मणा० पुरोडाशानामेव। आप्यायस्वेनी। यवे
दिकरणं। उद्वासनकाले। इदमहंपुरोडाशानां सूर्यंज्योतिः सर्वेषां। स्योनं ते० पुरो
डाशानां। पुरोडाशानांत्रस्मीमभिघारणं। आप्यायतांघृ० तेजसादित्यजु० आ
प्याय० तेजसाविष्णवे शिपिविष्टाय जुष्ट० आर्द्रः प्रथ० तास्मिन्सीद० पुरोडाशा
नां। आरर्द्धोभुवनस्य० चरोस्थाल्यासहैवोद्वासनं नास्ति। तस्मिन्सीद० प्रियेणआ
सादं तु। प्रजापती स्थः सर्वतश्रितो सर्वतो मांभ्रतं भविष्यश्रयेतां२० योनः कनी
य० प्रजोस्थः सर्वतश्रितो० अपंयज्ञः० विष्णु० चतुर्होता। ऐंद्राग्नस्य पंचहो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰आ॰
६३

र्ता। अयंवेदइत्यादि॰ आज्यभागांतेअग्नीषोमीयेन प्रकृतिवत्प्रचर्य॥ अग्नाविष्णुभ्या
मनुब्रूहि। अग्नाविष्णूयज॰ अग्नाविष्णूरहंदेवयज्ययावृत्रहा॰ इंद्राग्नीप्रकृतिवत्।
अदित्याअनुब्रूहि मेक्षणेनावदानं॥ अदितिंयज। अदित्याअहं॰ प्रजानिषीयप्रज
याचपशुभिश्च॥ विष्णवेशिपिविष्टायानुब्रूहि॥ विष्णुंशिपिविष्टंयज॥ वि
ष्णोःशिपिविष्टस्याहं॰ अन्नादस्विष्टकृदादि॰ चर्वोविरूप्यप्राशित्रं। अवशिष्टेतर र
योः। आदित्यस्येडावदानेइडापात्रेप्रस्तारेनिधाय उपहूतेइडां। आदित्यस्येडाभा
गंसर्वेब्राह्मणेयेणाहवनीयंपरित्यज्यदक्षिणेनशिष्टेडायाः स्वस्वभागंप्राश्य। आदित्येडा
भागंचतुर्धाविभज्य यजमानमेवलिप्तं प्राश्नंतिचत्वारआर्षेयाःप्राश्नंतीतिनिरुक्ततः॥ ६३

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

चतुर्धाकरणानि चर्वोरेव आदित्यस्य चतुर्धाकरणानि प्रज्ञातानि कृत्वा।
इदं ब्रह्मण इत्येवं चतुर्वीरमादित्यभागानामभिमर्शनं। प्राकृतिवद्दे
हवभागानां। अध्वर्युरादित्यस्य सर्वान्भागान्ब्राह्मणे परिहृत्य एकै
कं भागं सर्वे प्राश्नंति। ब्रह्मणो व्यस्तं भागस्यात्रैव प्राशनं। सर्वे प्रा
श्नंतीति वचनात् वै हवभागानां षडवत्तादिप्रकृतिवत्। धेनुमादि
त्येदक्षिणां ददाति। अन्वाहार्यमितरेषां। अन्वाहार्यस्य प्रकृतिव
त् ब्रह्मत्वं याजमानं च। ब्रह्मन्नु१ऽहुता घेमा मा हिंसीरहुता मह्यं
शिवा भव। प्रजापतेर्भागोस्यूर्जस्वती पयस्वती प्राणा° क्षितास्य
क्षित्यै इयं धेनुरमृतस्य पूर्णा सहस्रधारा सोक्षीयमाणा। सा दाधा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि०अ० र०दिवंचतया धेन्वा तितराणि मरुत्सु।ब्राह्मणा इमे ओदनं धेनुश्च हि संतायु
६४ थाभागं प्रतिगृह्णीध्वं॥देवस्य त्वा०देविदा।क्षिणे ब्राह्मण ओदनः रुद्राय गांता
भ्याममृतत्वमश्यां॥हुतानुमंत्रणवदुज्जितयः।चत्वारः पत्नीसंयाजाः।।न
पार्वणः।आज्यप्रणीतां विमोके कस्त्वा योक्षीत्स त्वा विमुंचतु।समुद्रं त्वा प्रहि
णोम्यक्षितः स्वां योनिमपि गच्छ॥अच्छिद्रः यानि घर्मे कपालानि०३ यांच
र्मे स्थालीमुपचिन्वंति वेधसः॥पूष्णस्तान्यपि व्रते०प्रकृतौ सर्वेषां कपालानां
सकृन्मंत्र पक्षेऽत्रापि सर्वेषामन्ते हनेसकृदेवेति मात्रदत्तः॥यानि घर्मे स्था
लीकपालान्युपचिन्वंतीं शेषं प्रकृतिवत्॥ ॥इष्टिः संतिष्ठते॥आधानप्र ६४
भृति यावज्जीवं ह[illegible]सभ्यावसथ्यौ पोषाजस्र

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

धारणं। एवैंषामजस्रपक्षे आहवनीयस्याप्यजस्रता यावज्जीवं। तस्योद्धरण
पक्षेपिद्वादशरात्रं मजस्रता। त्रयोदशदिने सायमग्निहोत्रमारभ्यार्थाया
हवनीयं गार्हपत्यादुद्धरति सोपवृत्ते कर्मणि लौकिको भवति। अग्न्याधा
नांगत्वेन शताधिकान ब्राह्मणान्भोजयेत्। अग्न्याधाने शतावरमि
तिवचनात्॥ ॥इतिश्रीसत्याषाढहिरण्यकेशीसूत्रानुसार्यग्न्या
धानप्रयोगः समाप्तः॥ ॥इष्टिपूर्वाधाने तु शुक्लत्रयोदश्या ०रंभः
चतुर्दश्यां सेष्ट्याधानमपरे।द्युस्तस्मिन्नेवाहनि चतुर्होत्रान्वारंभणीया
दिने घेवाग्निषु। सायंमंत्रवदग्निहोत्रारंभस्तेषे३ाग्निषुपयसा। सोम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हे॰आ॰

६५

पूर्वाधानेतुआग्नेयेष्टुंलंआधानंसमाप्यतद्दिवसेःमारुरणं।पवमानह
विंषिश्चानुनिर्वाप्याणिचसंवत्सरांतेकर्तव्यानि।संवत्सरपर्यंतंसायंप्रातर
ग्निहोत्रंतूष्णीमितिशास्त्रांतरस्थंमात्रदत्तोगृहीतवान्।दशहोतृहोमादि
मंत्रवदग्निहोत्रंद्वितीयसंवत्सरादिसायंकालेतत्प्रभृतिद्वादशरात्रमजः अ
धारणमाज्यहोमश्च।सोमानंतरमेवमंत्रवदग्निहोत्रारंभइतिसुवचनामेव
प्रतिभाति।आग्नेयेष्ट्यैवाग्न्याधानसमाप्तेः।नोचेत्तेष्वग्निषुसोमयागःकथंर
स्यात्।पवमानहविषांतुवचनादुत्कर्षः।तेननाग्निहोत्रोत्कर्षोभवितुमर्ह
ति।अथाग्निहोत्रारंभः।आधानानंतरंसायंकालेगणेशंसंपूज्यपुण्याहं
वाचयि[illegible]शुचिःसपत्नीकोऽहतवासाअपरेणगार्हपत्यंदर्भेष्वासीनोदर्भाँ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

धारयमाणः पत्न्या सह प्राणानायम्य देशा ।लौ संकीर्त्य श्रीपरमेश्वरप्रीत्य
र्थम्सं॰ कामो ग्निहोत्रमारप्स्ये। अग्निहोत्रमारप्स्यमानः कूष्मांडैर्होष्यामि।
स्कक्रुस्कवीसंमज्य। गार्हपत्यं आज्यं संस्कृत्याहवनीयपरिस्तीर्यपरिषिच्यद
र्वी होमधर्मेणयद्देवादेवहेळनमित्येकपंचाशदाहुतीर्जुहोति। उपस्थानंव
रदानं च। पुनः प्राणानायम्य अग्निहोत्रमारप्स्यमानोदशहोतारं होष्यामि।
पूर्ववदाज्यं संस्कृत्य। चतुर्गृहीत्वं गृहीत्वा। चित्तिस्रुक्। चित्तमाज्यं। सा॰॥ वर्षुः॥
वाचस्पते विधं नामन्। विधेम ते नाम। विधेस्त्वमस्माकं नाम। वाचस्पतिः सोमं
पिबतु। आस्मासु नृम्णं धात्स्वाहा। वाचस्पतये ब्रह्मण इदं॰ दार्विहोमधर्मेण जुहो
ति। पुनः सूर्यास्तानंतरं प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

द्वि० ७

सायंप्रातरग्निहोत्रंयावज्जीवंहोष्यामि।त्रिंशतंवावर्षाणि।आज्यस्यैवहो
६६ मेद्वादशरात्रं॥त्रयोदश्यांसायमग्निहोत्रंपयसा॥यस्मिन्दिवसेसायमग्नि थ
होत्रंपयसातदनंतरमाज्यहोमोद्वादशरात्रमितिकेचित्।तदयुक्तमिव इ
दानींसायमग्निहोत्रमाज्येनहोष्यामि।इतिसंकल्प्येध्माहरणादियजमा
नोऽध्वर्युर्वाग्निहोत्रंजुहोति।आयुर्मेयच्छेत्यस्यस्थानेभूर्भुवःसुवः।अर्पणा रे
हवनीयमग्निहोत्रमुपसादयति।व्याहृतिभिरेवसंवत्सरांतेप्रातरग्निहोत्रं
अथवाद्वितीयसंवत्सरारंभेसायमग्निहोत्रमितिकेचित्।तेसंवत्सरेतीतइति
व्याचक्षते।प्रथममग्निहोत्रायंयस्याःपयोगृह्णातिसागौरग्निहोत्रस्यद
क्षिणा।तामध्वर्यवेददाति॥ ॥अथान्वारंभणीया॥ आधानानंतरंपु ६
रुक्तकास्त्रादिरहितेप्रथमेपौर्णमासेप्राप्तेचतुर्दश्यामन्वारंभणीयाकर्तव्या॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

प्रातरग्निहोत्रं हुत्वा। शिष्टान्ब्राह्मणानृत्विजश्चामंत्र्य गणेशं संपूज्य दर्शपूर्ण
मासांगं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च कुर्यात्। पुण्याहवाचने अग्न्या
दयः प्रीयंतामिति विशेषः॥ यजमानः॥ अपरेण गार्हपत्यं दर्भेष्वासीनो द१
र्भांधारयमाणः पत्न्या सह प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वर
प्रीत्यर्थं स्वर्गकामो यावज्जीवं दर्शपूर्णमासाभ्यां यक्ष्ये। असति बाधके। त्रिं
शतं वा वर्षाणि। स्वर्गकामनायां सत्यां प्रयोगस्तेदनकाम विशेषः। ल मु
वरणं। उद्धरणपक्षे द्वादशरात्रमध्ये पौर्णमासप्रारंभेऽनत एवाग्नयः। नोत्स सा
र्गेनाग्न्यस्याहवनीयस्योद्धरणं। द्वादशरात्रमाश्वपदिकं एवाग्निहोत्रं हु
तोत्सर्गः। सायंकाले न्यमाहवनीयमुद्धराति। नयोर्दशो कोचिदन्य

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि॰आ॰

६७

शाखिनोदूरादराचमध्ये पौर्णसमाप्तौ आभ्वपादिकोत्सर्गंकुर्वंति। तदस्माकं

विरुद्धमेव। यजमानः। दर्शपूर्णमासावारभ्यमानः कूश्माण्डैर्होष्यामि।

अध्वर्युः। अग्निंविहृत्यपूर्वोक्तप्रकारेण कूश्माण्डहोमंकरोति। उपस्था

नंचरदानंचयाजमानं। यजमानः। दर्शपूर्णमासावारप्स्यमानोऽग्न्

तुर्होतारंहोष्यामि। अध्वर्युरुत्सृज्याग्निंपुनःप्रणीयगार्हपत्ये आ

ज्यंसंस्कृत्यचतुर्गृहीतंगृहीत्वाहवनीयंपरिस्तीर्य पृथिवीहोताद्यौ ६७

रध्वर्युः। रुद्रोग्नीत्। बृहस्पतिरुपवक्ता। वाचस्पतेहोत्वीर्येण।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

संस्कृततमेनायक्ष्यसे। यजमानायवार्यं। आसुवस्करस्मै। वाचस्पतिः
सोमं पिबति। जजनदिंद्रमिंद्रियायस्वाहा। वाचस्पतये ब्रह्मणइदं दर्विहो
मधर्मेणजुहोति॥ यज०॥ दर्शपूर्णमासावारप्स्यमानसारस्वतौहोमौहो
ष्यामि॥ ॐ० उत्सृज्याग्निंपुनःप्रणीयाज्यंसंस्कृत्यचतुर्गृहीत्वापूर्णा
पश्चादुतपूर्णापुरस्ता० दयंताᳪ स्वाहा॥ पौर्णमास्याइदं० दर्विहोम
धर्मेणजुहोति॥ पुनश्चतुर्गृहीत्वा॥ यत्तेदेवाअदधुर्भागधेय० सुभ
गेसुवीरᳪ स्वाहा॥ अमावास्यायाइदं० यजमानः॥ श्रीपरमेश्वरप्री
त्यर्थंदर्शपूर्णमासावारप्स्यमानोन्वारंभणीयेष्ट्यायक्ष्ये। सवितिम्ब

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

रणं। अध्वर्युः। उत्तरत्राग्निं पुनः प्रणीयान्वाधानादि० चतुर्होत्रर्थं प्रणीत एवाग्ना
वन्वारंभणीया कर्तव्येत्येके। ममाग्ने० अद्य यज्ञाया। इमामूर्जं चतुर्दशीं ये प्रबह
त्वान्वारंभणीयं हविरिदमेषां मयि। पौर्णमासं तंत्रं। बर्हिषा व्रतं। नो भावग्नी० क
र्मणे वां० पात्रसंसादनकाले एकत्रिंशत्कपाल्यानि चरुस्थालीं मेक्षणेन सह॥
अन्वाहार्यस्थालीवर्जं प्रकृतिवत्। निर्वपणे। देवस्य० भ्यामग्नाविष्णुभ्यां जुष्टं नि
र्वपामि० दे० भ्यां सरस्वत्यै जुष्टं० दे० भ्यां सरस्वते० देवस्य० भ्यामग्नये भगिने
जु० अग्नाविष्णू हव्यं रक्षेथां। सरस्वति हव्यं० सरस्वन् हव्यं० अग्ने भागिन् ह०
प्रोक्षणे० देव० भ्यां सरस्वत्यै सरस्वतेग्नये भगिने वो जुष्टं प्रोक्षाम्यग्नाविष्णु ६८

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

भ्यां अग्नये धावस्थाने । यथाभागं व्यावर्तध्वं । त्रयाणामेको राशिः । एकस्येकः ।
इदमग्नाविष्णुभ्यां सरस्वते चाग्नये भगिने च । पुरोडाशीयान् मिमृश
ति । इदं सरस्वत्यै चाच्युवर्थान् । उपधाने अग्नाविनाशीयवदेरां कोदके
पालान्युपधाय । अपाग्नेः आदेवं ध्रुवासि पृथिवीं दृंह स्वाहालीमदद
धाति । आग्नेय एव द्वादशकपालमुपदधाति । पंचकृत्वश्छिदसि । आग्ने
व पैंद्राकपालं । पिष्टान्युत्सूय नं दुग्धानुस्तुनाति पिष्टेषु श्रणीता आनी
य स्थाल्यामानयति । तथैव तस्माः । पिंडं कृत्वा । यथाभागं व्यावर्तध्वं ।
यथाभागं व्यावर्तेथां । इदं सरस्वते इदमग्नये भागिने । अंसयो
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हेम्आ० निर्देशः अथ ममाधि श्रित्य धर्मा स्थ विश्वायुषः स्थाल्यां तंडुलानावपति।
पर्यग्निकरणं उद्वासनेइदमहं पुरोडाशानां। सूर्यं ज्योतिः सर्वेषां। स्योनं
६० नंमिव। आप्यनिनयनांते वेदिकरणं। सूर्यज्योतिः सर्वेषां। स्योनं २ आग्ना
पुरोडाशा ने ३ येस्थवस्य। तूष्णीमभिघारणं। आप्यायतां घृतं० तेजसा सरस्वत्यै जुष्टमभि०
तेजसा सरस्वते जु० जसाग्नये भग्निने जु० आद्रोभुवनस्य० वरोः त
स्मिन्सीद ति पुरोडाशानामेव। प्रियेण० सीदंतु। प्रजापतिरसि स०
यज्ञास्थ सर्वतः। श्रिता स० धुयं ताः अयं यज्ञः० ममाग्ने ध्रुवतु होता। ६९
अयं वेद इत्यादि अग्ना विष्णुभ्यामनुब्रूहि। अग्ना विष्णू युज। अ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ग्नाविस्लोरेहं॰ स्वाहा। सरस्वत्याअनुब्रूहि। सरस्वतीयज। सरस्वत्याअ

ते हं। वाचमन्नाद्यं॰सरस्वत्यंनुब्रूहि। सरस्वं स्वतंयज। सरस्वतोहं॰अन्नादः। अ

न्नयेभगिनेनुब्रूहि। अग्निंभगिनंयज। अग्नेर्भगिनोहं॰ अन्नादः। जुहूं

द्वादशगृहीतंगृहीत्वादर्विहोमधर्मेणद्वादशाज्ययांजुहोति। चित्तंचस्वाहा।

चित्तायेदं॰चित्तिश्चस्वा॰चित्तयइदं॰ आकूतंच॰आकूतायेदं॰आकूतिश्च॰आ

कूत्याइदं॰ विज्ञातंच॰ विज्ञातायेदं॰ विज्ञानंच॰ विज्ञानायेदं॰मनश्चस्वा॰म

नसइदं॰शक्करीश्च॰ शक्करीभ्यइ॰ दर्शश्च॰ दर्शायेदं॰ पूर्णमासश्च॰पूर्ण

मासायेदं॰ बृहच्च॰बृहतइदं॰ रथंतरंचस्वाहा। रथंतरायेदं॰पुनःसकृद्गृहीत्वा।

प्रजापतिर्जयानिं॰बभ्रूवस्वा॰प्रजापतयइदं॰ पुनःसकृद्गृहीत्वा। अग्नेवत्त

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

दसहृञ्जआक्रमप्राणायमेदाः। अभिशस्तिकृतेनाभिशस्तेन्यायास्यैजनतायैश्रेष्ठ्यायस्वाहा। अग्नयइदं० स्विष्टकृतादि० अंत्यानांत्रयाणांविरुज्यप्राशित्रं। तेषामेवचतुर्धाकरणं। ब्रह्मणीब्रह्मणीस्थोब्रह्मणेवांजुष्टंकृता

द्यौमामाहिंसिष्टावकृतौमह्यंशिवौभवतं। प्रजाप० तेभ्योगौस्थऊर्जंस्वंतौ

मे पयस्वंतौप्राणापानौपातंसमानव्यानौमेपातंमक्षितौस्थोक्षित्यैवांमा

मेक्षेषाथाममुत्रामुष्मिँल्लोके। इमौमिथुनौगावावम्रतस्यपूर्णौसहस्वधः रानुत्सावक्षीयमाणौ। तौदप्रकुःपृथिवीमंतरिक्षंदिवंचताभ्यांगोभ्यामतितराणिमृत्युं। ब्राह्मणाइमौमिथुनौगावानकुंसंतः प्र० देवस्यत्वा० देविद क्षिणेरुद्रायगावौताभ्याममृत० कृतानुमंत्रणवर्तुज्जितयः। नपार्वणः। ७०

मुतानामानौमेपात

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

इष्टिः संतिष्ठते। संतिष्ठते न्वारंभणीया पौर्णमास्यां प्रातरग्निहोत्रं कृत्वा केशश्मश्रू णि वापयित्वा अपरेण गार्हपत्यं दर्भेष्वासी० संकोर्त्य श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां यक्ष्ये ३ समुदायसंकल्पं कृत्वा। पुनः पौर्णमासेष्ट्या यक्ष्ये। इति संकल्पं कुर्यात्। दर्शे तु दर्शेष्ट्या यक्ष्य इत्येव॥ ॥ अथ पुनराधेयं॥ तत्र निमित्तानि। अग्न्याधाने कृते तस्मिन्नेव संवत्सरे यजमानस्य ज्यानिं पुत्रमत्यों वान्वेति स्वेन वांगेन विरुध्यते न व धीति स पुनराधेयं कुर्वीत। तत्र सावन संवत्सरमध्ये जाते निमित्ते सति कर्तव्यं। पौर्ण मासेष्ट्यनंतरं जाते निमित्ते दर्शपर्यंतमग्निहोत्रं जुहुयात्। अमावास्यायामुद्वासनेष्टिं कुर्यात्। दर्शेष्ट्यनंतरं निमित्ते आगाम्यमावास्यापर्यंतमग्निहोत्रमंतः पातिनी पौर्णमासेष्टिं कृत्वाऽमावास्यायामु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

द्वासनेष्टिः कार्या। तस्याः प्रयोगः। अनुनिर्वाप्यैः सह समानतंत्रतामाश्रित्य
लिख्यते। आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशाकपालमग्निमुद्वास
यिष्यन्। अग्नीषोमीयमेकादशाकपालं मनु निर्वपेदग्नये वसुमतेऽष्टाक
पालं मैत्रं चरुं। गार्हपत्यस्य पश्चाद्दर्भेष्वासीनो· संकीर्त्य श्रीपरमेश्वर
प्रीत्यर्थं पुनराधेयं कर्तुमनुनिर्वाप्यैः सह समानतंत्रं कुर्वन्नग्न्युद्वासनेष्ट्या
यक्ष्ये। ऋत्विग्वरणं पौर्णमासंतंत्रं। ममाग्ने· अध्वयज्ञाय· इमामूर्जमिध
मं· एष स्वहविः· बर्हिषा प्रतं· त्रयोविंशति धाम· परिस्तृ· नाभावग्नी·
पात्रासादने एकान्नचत्वारिंशत्कपालानि चरुस्थाली च। अन्या
नि प्रकृतिवत्। निर्वापे· देवस्य त्वा। वैश्वा ।नये जुष्टं· अग्नये वैश्वानरा ७१

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुष्टं० अग्नीषोमाभ्यां जु० अग्नये प्रमते जु० मित्राय जु० अग्नये हव्य॰
अग्ने वैश्वानर० अग्नीषोमो ह० अग्ने प्रमन॰ मित्र हव्य॰० देवस्य त्वा०
हस्ताभ्यामग्नये ग्नये वैश्वानरायाग्नये प्रमते मित्राय वो जु० प्रो
क्षाम्यग्नीषोमाभ्यां। अंऽशवस्त्वांते। यथाभागं व्यावर्तध्वं। चतुर्णा
मेको राशिः। एकस्यैकः। इदमग्नये ग्नये वैश्वानरायाग्नीषोमाभ्या
मग्नये प्रमते च। पुरोडाशीयानुपलक्षयति। इदं मित्राय च। चरुव्या
न। कपालोपधानकाले आग्नेयस्याष्टोउपधाय वैश्वानरस्य। द्वमा
दीति पंच कृत्वश्चिदसीत्यनेनावृत्य। अग्नीषोमीयस्य प्रकृतिवत्।
अग्नये प्रमते ष्टावुधाय अपाग्न इत्यादि० ध्रुवासि ध० थिवी० स्थालीमु
प

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पधायभगूणां० तप्यस्व। हयोर्स्त्वेतिपिष्टान्युत्सृप्य देवोवइतितंडुलानु
त्पुनाति। पिष्टेषुतप्ताआनीय। स्त्रालयामानयति। यथाभागं व्यावर्त
ध्वं। २ यथा०र्तेथां। इदमग्नीषोमाभ्यां। इदमग्नये प्सुमते। कुरोऽ शा
नपिष्ठिस्यधर्मा स्छेतितंडुलानांवपति। प्रथनाभि०ब ह नभस्माभि
वासनानिचरो। चतुर्णां मंत्रेणाभिघारणं। लक्ष्मीमग्नीषोमीयस्य।
प्रियेण०। सीदंतु। यज्ञस्ठ सर्वत० प्रजापतिरसि० अयंयज्ञः० वि
हव्यं। चतुर्होता। प्रकृतिवदाग्नेयः। अग्नयेवैश्वानरायानुब्रूहि०
अग्निंवैश्वानरंयज० अग्नेर्वैश्वानरस्याहमन्नादः प्रकृति ७२
वदग्नीषोमीयः० अग्नयेप्सुमतेनुब्रू० अग्निमप्सुमतंयज। अग्नेर

सुमतो हं। अन्ना दः मित्रा यानु ब्रू० मित्रं यज। मित्रस्याहं० अंदेः जो।
अस्माकं म्य ध्रुवा तो जुह्वां समग्रहीत्वा प्रतिग्रहणं ध्रुवाप्यायनं।
सप्त समिधोप्याधाय याग्रेणाहवनीयं परीत्य दक्षिणतस्तिष्ठन्विश्रा हं जुहोति।
याते अग्न उत्सीद तः। पवमाना पशु षु प्रिया तनूस्तया सह पृथिवी माविश रथं
तरेण साम्ना गायत्रेण छंदसा ततो नो महत्र आवह स्वाहा। अग्नय इदं० याते अ
ग्ने पावका या मनसा श्रेयसी प्रिया तनूस्तया सहांतरिक्षमाविश वामदेव्येन
साम्ना त्रैष्टुभेन छंदसा ततो म ऊर्ज माकृधि गृहमेधिं च वर्तय स्वाहा। अग्नय इदं० यं
याते अग्ने सूर्ये शुच्चिः प्रिया तनूस्तया सह दिवमाविश बृहता साम्ना जागते
न छंदसा ततो नो वृष्ट्यावधिः स्वाहा। यास्ते अग्ने विभक्तीः इंद्र सूकर आभर

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि० तासु शोचिषु सीदेह भस्म वैश्वानरस्य च स्वाहा। यास्ते अग्ने कामदुघा
विभक्ता ऋतुसंभृताः। ताभिर्नः काममुक्षेह प्रजां पुष्टिमथो धनं स्वाहा।
७३ ये ते अग्ने वानस्पत्याः संभाराः संभृताः सह। तेभिर्गच्छ वनस्पतीन्।
स्वां योनिं यथायथं स्वाहा। अग्निर्यथा लोकमसदत्सदने स्वे। अ
वीरहत्यं देवेषु पाणां मनसा सह स्वाहा। अग्नय इति सर्वत्र त्यागः। स्विष्ट
कृदादि। अग्नीषोमीयवर्जं चतुर्धाकरणं। अन्वाहार्यो दक्षिणा। पार्वण
पुनरालंभवर्जं संतिष्ठते। ततोऽवकल्पोऽग्नीन्प्रचोदेशे वसन्ति वत्सु पूर्व
वदाति बौधायनः। इष्टिः संतिष्ठते। एवमुद्वासने ष्टिं कृत्वा ऋतुर्नक्ष ७३
त्रपर्यंतमव सत्साग्निः। तिष्ठेत्। पारद्रुतेरं निमित्ते आगामि दर्शेऽ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

त्सर्गेष्टिं कृत्वा वर्षर्त्तुपर्यंतं विसृष्टाग्निस्तिष्ठेत् ॰ वर्षर्त्तूत्तरं निमित्ते प
र्ववत्सरपर्यंतं विसृष्टाग्निस्तिष्ठेत् ॥ ॰ दैवान्मानुषाद्वा प्रतिबंधात्तत्तदृतौ
दर्वाङ् पुनराधेयाकरणे संवत्सरा[illegible]न्विसृष्टाग्निर्भवति ॥ तदुत्तरं स्थितश्चे
त्तावत्कालमनाहिताग्निता दोषप्रायश्चित्तं कुर्यात् ॥ वर्षासु शरदि वा नि
मित्ते नंतरपर्वणि प्रकृतिपूर्वामुत्सर्गेष्टिं कृत्वा तस्मिन्नेव तौ द्वादशा
हं विरम्य तदर्वाग्वा पुनराधेयं कुर्यात् ॰ उक्ते नक्षत्रे ॥ तानि नक्षत्राणि
रोहिणी पुनर्वसू अनूराधाश्चेति ॥ तयोरेवर्त्वोर्निमित्तस्य नंतर
पर्वण्युत्सर्गेष्ट्यसंभवे आगामिशरदृतुप्रथमपर्वणः पूर्वं उक्ते न

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ग.हि. तत्रैव पुनराधेयं कार्यं। तत्पूर्वपर्वणि प्रकृतिपूर्वामुत्सर्गेष्टिं कृत्वा तदुत्त
७४ रं द्वादशाहमध्य एव नक्षत्रे पुनराधेयं। निमित्तोत्तरं यावदुत्सर्गेष्टि
मग्निहोत्रं दर्शपूर्णमासौ च कर्त्तव्यौ। अथवा प्रथमपर्वणः पूर्वं नक्ष
त्रासंभवे प्रथमपर्वण्येव प्रकृतिपूर्वामुत्सर्गेष्टिं कृत्वा तस्यामेव रात्रौ
ब्रह्मौदनं श्वः पुनराधेयं चेति। उक्तवौरस्य पर्वणः पूर्वं समीप एव नि
ह मित्ते सति तस्मिन्नेव पर्वणि प्रौतिपूर्वामुत्सर्गेष्टिं कृत्वा तस्यामेव
रात्रौ ब्रह्मौदनं श्वः पुनराधेयं चेति। तदपि प्रातिपदघुपक्रमात्सर्वाधान
मेव भवति। एते च पक्षाः स्वसूत्रस्थाभाष्यवृत्तिव्याख्याकर्द्धिरंगीकृ ७४

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

तायथासंभवमंगीकरणीयाः। संवत्सरादर्वाक् ज्यान्यादिनिमित्तकपुनराधेयउ
भयानुगमनादिनिमित्तेन प्रायश्चित्तपुनराधेयेतुनकालनियमः। नोद्वासनेष्टिः।
निमित्तोत्तरं पुनराधेयमेवकर्तव्यं। संवत्सरादर्वाक्पुनराधेये निमित्ते सति अग्नयोन
ष्टाविच्छिन्नावायदित दाउक्तविधिनाग्नीनुत्पाद्यउत्सर्गेष्टि पूर्वकंविहितकाले पु
नराधेयंकुर्यात्। अथप्रयोगः। उक्तनक्षत्रेउक्तेपर्वणि चर्त्विजो ब्राह्मणांश्चाहूय
शालासंमार्जनादिकृत्वाधानोक्तरीत्यागणपतिपूजनपुण्याहवाचनमातृकापू
जननांदीश्राद्धानिकृत्वासंकल्पंकुर्यात्। औपासनस्य पश्चाद्दर्भेषूपासीनइत्यादि
ज्यान्यादिनिमित्तेनावसृष्टानामग्नीनां श्रीपरमेश्वरप्रीत्यर्थंपुनराधेयंकरिष्ये॥
अथवाअमुकनिमित्तेनावसृष्टाग्नीन्पुनराधास्ये॥ ऋत्विग्वरणादिसंभारनिर्वप

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि० मां तमग्न्याधानवत्कृत्वा मंथनोग्न्याधानार्थं मध्यंदिनं प्रतीक्षते। असंभारप
न क्षे तु संभारसंभरणसंभारनिर्वपणवर्जं स्वरहोमांतं कृत्वा मध्यंदिनं प्रतीक्षेत्.
संगवेतीते पोहर्ष्यो आस्तो हविकृत्यमस्मेत्याहि. अजीजनेन्न मृतमित्संतंकृ
त्वा। भूर्भुवः आदित्यानां त्वा. भूमिर्भूम्ना द्यौः. आयं गौः. त्रिंशद्धाम। अस्य
प्राणात्. घर्मःशिरः प्राणो त्वा मृत. अग्नेग्र्हपतेपरिषद्य. शमन्तहोमां.तं कृत्वा
सुगार्हपत्य इति यजमानेनोपस्थाने कृते। अध्वर्युः। मनो ज्योतिर्जुषतां. बृह
स्पतिस्तनु तामिमं न्तो विश्वे. आहितं गार्हपत्यमुपतिष्ठते। असंभारपक्षे य
थर्ष्याधानमंत्राभाव इति केचित्। न तत उपमूललूनैः संवत्सरजीर्णैः शुष्कैः दर्भैः ७५

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

राहवनीयाधानार्थमिध्मं बध्वा सहायार्थमन्यान्यपि पक्षरक्षकाष्ठानि म
ध्ये दत्वा गार्हपत्येग्निप्रणयनानीत्यादि उपर्यग्नौ धार्यमाणे। आग्नीध्र
गार्हपत्यादग्निं पात्रांतरे गृहीत्वा प्राङ्मुख एव दक्षिणाग्निमादधाति।
भुवः आदित्यानां त्वा० पृथ्व्याऽकुसः परोक्षपमन्युना यदत्वस्यां कुकल्पम
ग्नेतत्तनपुनस्त्वोद्दीपयामसि। ततः प्राणः० अग्ने त्वपामयो भुवः० त
थैव यजमानस्योपस्थानं। शमनहोमौ त्ते। मनोऽप्योतिरित्युपस्थाय पु
नतो ध्वर्युरग्नितनूर्वाचनादि यद्दिदं दिव इत्यभिमंत्रणांतं ...ग्न्याधा
नवत्॥ ततः भूर्भुवः सुवः आदित्यानां त्वा० यत्ते मन्युपरोप्तस्य पृथिवीम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आ०

तुदध्वंसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्। अर्कश्च ६ मा
यं त्वा मृतं गुह्ये॥ अग्ने सम्राट्। यजमानोपस्थाने सार्प॰ नौ स्था
७६ नेऽअर्ध्वयूवन्मंत्रः। शमनहोमः। आनशइत्युपस्थानं तं मौ नोऽयो
तिरित्युपस्थाय पुनस्त्वादि सेत्युपसमिंधे। स्रुचाहि र्गृहीत्वाद
विहोमधर्मेण जुहोति। पुनस्त्वादित्या रुद्रा वसवः संमिधतां पु
नर्ब्रह्माणो वसुनीथ यज्ञैः। या इष्टा उषसो निम्रुचश्च ताः संदधा
मि हविषा घृतेन स्वाहा। होममनसे ज्योति [illegible] सम्यावसथ्यपक्षे ७६
तयोरप्याधानवत्सर्वं मनोज्योतिरित्युपस्थानं च। शिवाभिरुप
उषा निम्रुग्याज्याभ्यइ ८० मं॰ ऽ ४ो॰ २

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

स्छानं समिदाधानं। यजमानस्यघोराभिरुपस्छानं। नप्रातराग्निहोत्रं। त
त्छाने पूर्णाहुतिः। वरदानं। द्वितीयापूर्णाहुतिः॥ यजमानस्यशिवाभिरूपस्थानं
विराजक्रमोपस्थानंपंचधेन्युपस्छानंच॥ इतिपूर्णाहुत्यंतं॥ अथेष्टयः इष्ट्यय
क्ष्ये॥ सर्वमंगप्रधानंश्रोतमाद्धनूयाजादुपांशु। ममाग्ने० अग्नयज्ञ्यास० इमा
मूर्जंयथातिथि। स्थिष्ट्वं हविः। कालतस्तंत्रं। तथावेदिकरणं। व्रतग्रहणंच॥
परिस्तृणीत० नोभावग्नी० कर्मण्वो० पात्रप्रयोगे पंचवाष्टौवाकपालानि॥
शेषंप्रकृतिवत्। निर्वापे०। अग्नयेजुष्टं० प्रोक्षणीसंस्कारांतंकृत्वा। अध्व
र्युः॥ कल्पेतांद्यावा० सव्रताः। येग्नयः स० पृथि० वार्षिकाद्रुतूइ० अभि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

शारद्दा वृत्तू इति। प्रोक्षणादि० वेद्यां तृणमपि सृजतीत्यंतं प्रकृतीवत्॥ ततः प्राकृ
स्रुगादापनात्स्रुवेण स्थाल्याज्यमादाय वेदमुपभृत्स्थाने त्वाकृ दर्विहोमधर्मेण जुहो
तीति वैजयंतीकारः। न वेदोपयद्द दर्विहोमधर्माविति मात्स्यदत्तः। पुनरूर्जा निवर्तस्व
पुनरग्न इषायुषा। पुनर्नः पाहि विश्वतः स्वाहा॥ अग्नये भ्या। बलिनिदं० ततः स्रुगापा
दनादि० प्रयाजानामुपरिष्टाद्धा॥ तस्मिन्पक्षे जुह्वा ध्रुवाज्यासेचनं दृष्टीलेन ध्रुवाप्या
मी यनं च। अत्राप्याज्यस्थाल्याज्यमिति वैजयंतीकारः॥ उभावाग्नेयाज्यभागौ० अग्नये वृध
न्वतेऽनुब्रूहि। अग्निं वृधन्वंतं यज। अग्निर्वृधन्वांश्चक्षुष्मांस्तस्याहं देवयज्यया चक्षु
ष्मान्भूयासं। अग्नये पवमानायानुब्रूहि॥ अग्निं पवमानं यज। अग्निः पवमानश्चक्षु ७
ष्मांस्तस्याहं० प्रधानयागः प्रकृतावेव वेत्। अन्वाहार्येण महान्याधेयिकीः पौ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

नराधेयिकीम्ब्रुद्दाति। अपिवापौनराधेयिकीरे वा पुनर्निष्कृतो रथः॥ पुनरुत्स्यू
तं वासः पुनरुत्सृष्टोनड्वान्॥ अश्रान्तमानं च हिरण्यं। एताः पुनराधेयदक्षिणाः॥ इति
यह मंत्रः। देवस्य त्वा० प्यांप्रति गृह्णामि। राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वा
नराय रथं वैश्वानरः प्रत्नथा नाकमारुहद्दिवः पृष्ठं भंदमानः सुमन्मभिः। स पूर्ववज्ज
नयज्जंतवे धनं समानमज्मा परियाति जागृविस्तेना मृतत्वमित्या० देव० दक्षिणे
सोमाय वासो ग्नास्त्वा कृतन्नवयसो अतन्वत। वरुत्रिरहमनव्वर्धा। यो अष्टतं चतेनास्य०
देव० परुद्राय गां तेना० अपिवा। ब्रह्माणो ब्रह्माणः स्थ ब्रह्मणे वो जुहुता द्यामा मा हिं
सिष्टा ऊर्जा मह्यं शिवा भवतु। प्रजापते भोगस्थ ऊर्जे स्वं तादि० इमे रथवाहो नडु
हो मृतस्य पूर्णाः सहस्रधारा उत्सा अक्षीयमाणा ते दधतु पृथिवीमंतरिक्षं दिवं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

चतैरथवासोनडुङ्गिरति॰देविद्दक्षिणेवैश्वानरायरथंवैश्वा॰गृविःसोमायवा
सोग्नास्त्वा॰अष्टतंचरुङ्गायगांतैरमृततत्त्वमित्यादिमंत्रः।इध्मसंनहनप्रहर
णानंतरंस्रुवेणस्थाल्याज्याज्जुहोति।सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया॥
विश्वप्स्न्याविश्वतस्परिस्वाहा।अग्नयेभ्यावर्तिनइदं॰स्रुवेणजुहोतीतिमा
त्रदत्तंवैजयंतीकारो।जुह्वास्रुवायाआहवनीयइतिपरिभाषातः।स्रुवाज्याज्जु
ह्वैव।तयोशब्दायंनवेति।अनूयाजानामुपरिष्टाद्धा।उच्चैरुत्तममनूयाजंसंप्रे
ष्यति।वाजवत्यादि॰नहविःशेषभक्षणं।नपावेण।नपुनरालंभः।इष्टिःसंति
ष्ठते॥ ॥तेष्वेवाग्निषुपवमानहविषांसमानतंत्रंकुर्वन्निष्ट्यायक्ष्ये।नाग्नेयेन
समानतंत्रता।धर्मभेदात्।ममाग्रइत्यादि॰कालततंत्रं।सप्तदशसामिधे

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

न्यः। पात्रासादनंकाले चतुर्विंशति कपालानि। अन्वाहार्यस्थालीवर्जं प्रकृति वद्भ्योप्याग्नेयाः। त्रिंशन्मानेचत्वारिंशन्मानं च हिरण्यं दक्षिणाः। ब्रह्मन्नप्र सि० अकृतंमह्यं शिवं भव। प्रजापतेर्भागोस्यूर्जस्वत्पयस्वत्प्राणाक्षितमस्य क्षित्यै० ब्राह्मणाइमानि वो हिरण्यानि यथाभागं प्र० देवस्य त्वा० येग्नये हिरण्यं ते० पार्वणपुनरालंभवर्जं संतिष्ठते । तेष्वेवाग्निषु। सर्वेषामनुर्वीप्यानां स्थाने नेष्ट्या यक्ष्ये। ममाग्ने० पौर्णमासंतंत्रं पात्रासादानेएकादशकपालानि॥ निर्वापे अग्नीवरुणाभ्यां जुष्टं निर्वपामि। देवस्य० भ्यां वो जुष्टं प्रोक्षाम्यग्नीव रुणाभ्यां। तूष्णीमभिघारणं। प्रियेण ना० आसीदतु। प्रजापतिरसि। अयं यज्ञः विहव्यः चतुर्होता० अग्नीवरुणाभ्यामनुब्रूहि० अग्नीवरुणौ यज० अग्नी

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

क

हि·आ· वरुणयोरहं देवयज्यया वृत्रहा० न चतुर्धा रेणं। अन्वाहार्यो दक्षिणा। पार्वणपुनरालं

७९ भनवर्जं॥ ॥इष्टिः संतिष्ठते॥ ॥संतिष्ठते पुनराधेयं। तृतीयमाधानं नाम। पूर्वाधाना

त् ज्यान्यादिनिमित्तेन पुनराधेयाद्यान्यत्० अरणीनाशादिविनिमित्तेन प्रायश्चित्ता

दि अर्थमग्न्याधेयधर्मकं पुनराधेयधर्मकं वा यत्कर्म तत्तृतीयाधानं तदेव पुनराधे

यात्॥ पराचीनमग्न्याधेयमित्युच्यते॥ तत्र पूर्णाहुतेरनंतरं प्रथमाया इष्टेः

पुरस्तात्स्विष्टकृतो वा दर्विहोमधर्मेण तिस्र आहुतीर्जुहोति विग्राहं। लेकः सले

कः सुलेकस्ते न आदित्या आज्यं जुषाणा वियंतु स्वाहा। आदित्येभ्य इदं० केतः स

केतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियंतु स्वाहा। आदित्येभ्य इदं० विव ७९

स्वाँ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियंतु स्वाहा। आदित्येभ्य

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ती

इतरत्सर्वं समानं। संतिष्ठते तर्याधानं। अथाग्निहोत्रं। यज्ञं॰ अधि
वृक्षसूर्ये गार्हपत्यस्य पश्चाद्दर्भेष्वासीनोदङ्मुखः॰ प्राणानायम्य स्व
र्गकामः श्रीपरमेश्वरप्रीत्यर्थं सायं प्रातरग्निहोत्रं होष्यामि। तत्रैव
नै। सायमग्निहोत्रं पयसा होष्यामीति सायं। उषसि प्रातरग्नि
होत्रं पयसा होष्यामीत्येव प्रातः। द्रव्योद्देशेन वा कर्तव्यः। अध्वर्यु
वरणं। उक्तरइति शेषः। अध्वर्युस्तस्मिन्नेव काले। गार्हपत्येंधनानि
प्रक्षिप्य तं प्रज्वाल्य। दक्षिणाग्निं च प्रज्वाल्य। वाचा त्वा होत्रा प्राणे
नोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीधैतैस्त्वा पंच
भिर्दैव्यैर्ऋत्विग्भिर्वृणोमि। त्वं होमहोतासि पूर्वः स्वधामभूर्भुवः

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

०हि० सुवरुध्रियमाणउत्सरपाप्मनोमायदविद्वान्यत्र विद्वांश्चकार। अज्ञा
यदेनः कृतमस्ति पापं सर्वस्मान्मोऽस्ध्नतो मुंचतस्मात्० सायमग्निहो
त्रायज्वलंतं गार्हपत्यादाहवनीयमुद्धरति। वाचा त्वा होत्रा प्राण० रात्र्या
यदेनः कृतमस्ति पापं इति प्रातः। तूष्णीं प्रणीय। अमृताहुतिममृतायां
जुहोम्यग्निं पृथिव्याममृतस्य जित्यै। तयानंतं काममहं जः यामिप्र
जापतिर्यं प्रथमो जिगायाग्निमग्नौ स्वाहा। सूर्याधाभिमुखः सायमाहवनी
यायतने प्रतिष्ठापयति अमृताहुतिमम० जिगाय सूर्यमग्नौ स्वाहा। इति सूर्या
भिमुखः प्रातः। उभयत्र प्राङ्मुख एवेति स्वसूत्रार्थः। इदं तु नाजस्त्रपक्षो एकयो ८०
नित्वपक्षेपि दक्षिणाग्नेर्वचनान्नित्यं धारणं। नित्यं गार्हपत्यदक्षिणाग्नी धार्ये

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मे। तथासभ्यावसथ्यादिति। उद्धरणं तु आहवनीयस्यैव। गतश्रीणां अनुच्छामस्य च नित्यं सर्वेषां धारणं। तस्मिन्पक्षे न प्रत्यहमाहवनीयस्योद्धरणं। उद्धरणपक्षेपि नक्तं अजस्रधारणपक्षे सायं सायमुद्धरणं सायमुद्धरणकल्पेनैव। तस्य वाग्नेः प्रातरग्निहोत्रार्थं धारणं। नतु नरुद्धरणं। सायं संध्योपासनोत्तरं अस्तोत्तरकाल एव नक्षत्रं दृष्ट्वा घटिकाद्वयात्मकप्रदोषे वा सायमग्निहोत्रस्य त्रिविधो मुख्यः काल्तः। उषसि० पुरोदयं उदिते वा त्रिविधः प्रातरग्नि होत्रस्य मुख्यः कालः। एते कालाः प्रथमपरिग्रहण व्यवस्थिताः। अस्तमिते उदिते होमः। यज० काण्डके लोपवर्ग गृहीत्वा। विष्णु शानी माभरंतानानुरि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हि
९१

णमनसाग्ने मातेप्रतिवेशारिषाम तर्थेन विहारमभ्येति यदग्नेयानिका
निचातेदारुणिदध्मसि। तदस्तुतुभ्यमिनद्धृतंतज्जुषस्व यविष्ठ्यस्वा
हा। अग्नयइदं। आहवनीयेसूक्तकाष्ठमादधाति। यदत्युपजिह्विका
यद्वम्रो अतिसर्पति। सर्वंतदस्तुतेघृतंतज्जुषस्वयविष्ठ्यस्वाहा। गार्हप
त्ये। रात्रिं रात्रिमप्रयावंभरंतोश्वायेवतिष्ठतेघासमस्मै। रायस्पोषेण
समिषामदंतोग्नेमात्तेप्रतिवेशारिषामस्वाहा। दक्षिणाग्नौ। विद्युदसि शि न

विद्यमेपाप्मानमृतं सत्यमुपैमि मयिश्रद्धा। उत्तरेणविहारमपउपस्प ८१
शति। अपरेणाहवनीयंदक्षिणेनदक्षिणाग्निक्रम्याहवनीयदक्षिणतउप
विशति। पत्नीपत्यालोके। इडासिव्रतमिदहं नावुभयं श्रतंचरिष्याम्या

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

द्विसन्त्रत भद्रहंनावुभयोर्व्रतंचरिष्यामिस्वरूपेहंनावुभयोर्व्रतंचरि
ष्यामीडएहिमयिश्रयस्व। यदग्निहोत्र्याग्नेर्घासिरूपंजतंतदात्मनि
संकल्प्यजपति। अध्व० परिसमूहनेनाग्नीनलंकरोति। अग्नेगृह
पतेशुंधस्व। गार्हपत्यं। अग्नेवन्हेशुंधस्व। दक्षिणाग्निं। अग्नेसंम्रा
ट्शुंधस्व। आहवनीयंपुरस्तादलंकाराःसायं। उपरिष्टादलंका
राःप्रातः। उभयतोभयतोलंकारावा। दर्भैरग्नीन्परिस्तीर्य।
आहवनीयगार्हपत्यदक्षिणाग्नीन्। उत्तरेणगार्हपत्यंदर्भे
षुपात्राण्युत्तरसंस्थानिन्युब्जानि। स्रुवमग्निहोत्रहवनीमग्नि
होत्रस्थालीमुपवेषंकूर्चंच। दक्षिणतोविहारंगोरवस्थिताम
यंति इडएत्यद्क्षिणतोहिरण्यपेहिमेहि। नामान्यदितियजमा०
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हृ०आ

८२

अग्नएहि सत्येन त्वाहुयामि। आहूयमानामनुमंत्रयते। अध्व० पूषासि।
वत्समुपसृजति प्राचीमुदीचीं वा गामाहृत्य। उदगदन्योदोग्धि तूष्णीं स्था
ल्यां दोहने वा नदुग्धं संमृशति। यजमानः उर्गमसि तस्त्वेग्निर्वत्सः सोमस्तनं स्या
चलोकमुभयं च धुक्ष्व। दुह्यमानां गामनुमंत्रयते। अध्वर्युः। दोहने दुग्धं च स्था
ल्यामानयति। ऋतं त्वा सत्येन परिषिंचामि। सायं। आहवनीयं परिषिंचति।
एवं गार्हपत्यं दक्षिणाग्निं च। सत्यं त्वर्तेन परिषिंचामीति प्रातः। यज्ञस्य संतति
रसि यज्ञस्य त्वा संतत्यै नयामि संतत्यै त्वा यज्ञस्य। गार्हपत्यात्संततामपो धा
रां स्रावयत्याहवनीयात्। गार्हपत्यस्य पश्चादुपविश्य। धृष्टिरसि ब्रह्मय
च्छ। उपवेषमादाय। निरस्तं जन्यं भयं रक्षः सहतेन यं द्विष्मः सुभूतापश्चयध्वं। ८२

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

गार्हपत्यादुदीचोंगारांनिरूहति। तूष्णीं व्यंतांनकरोति। इळायाःपदंघृ
तवच्चराचरंजातवेदोहविरिदंजुषस्व॥ येग्राम्याःपशवोविश्वरूपा
स्तेषाꣳसप्तानामितिहरंतिरस्तुपुष्टिः॥ तेषग्निहोत्रमधिश्रयति॥
उद्भवस्थोदहंप्रजायापशुभिर्भूयासं॥ आदीप्तेनतृणेनाग्निहोत्रमवे
क्षते॥ हरस्तेमाविनैषं॥ स्रुवेणाद्भिःपरिषिंचति॥ गोदोहनसंक्षालने
नवाप्रतिषेकः॥ अंतरितꣳरक्षोंतरिताअरातयः॥ गार्हपत्यस्योल्मु
केनपर्यग्निकरोतित्रिः॥ उल्मुकंनिरस्यापउपस्पृश्य॥ घर्मोसिरा
यस्पोषवनिरिहोर्जयिपव॥ सुभृतंवर्त्मकुर्वेनुदगुद्वासय। तेप्रजांमेय

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

व०आ० छ।समी(प)एवभूमौ स्थापयति।प्रत्युष्टं जन्यभयं सनतेहेन यं द्विष्मः स्मभूत मकर्ता।एष
२ उपवेषेण गार्हपत्यं गारान्समूहति।देवस्य त्वा सवितुः प्रस०भ्यामाददे।मंत्रावृत्त्या स्त्र
वमग्निहोत्रहवणीं चाददाय।प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः।गार्हपत्ये स्रुवमग्नि
होत्रहवणीं च सह निष्टपति।स्रुवमग्निहोत्रहवणीं च सव्येनोत्तानेन धृत्वा।स्रुव
र्णी त्वा सुपर्णमयीं हिरण्ययष्टीरस्य मत पालाश स्तोतो यज्ञानां।दक्षिणेन हस्ते
नाग्निहोत्रहवणीं संमार्ष्टि।अरिष्टो यजमानः पत्नी च।स्रुवाग्निहोत्रहवण्यौ सहै
व संमार्ष्टि।पुनर्निष्टपनं केचिदिच्छंति।यावदुन्नयनं हस्त एवाग्निहोत्रहवणी।ॐ सु
न्नेष्यामि हव्यं देवेभ्यः पाप्मनो यजमानं।सायं यजमानमंत्रयते।ॐ सुन्नयामि हव्यं०य ८३
जमानं।प्रातः।यजमा० हविर्देवानामसि मृत्योर्मे भयं स्वमसि मे त्वभयं मे स्त।उपां

